कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2322 विषय

नाव श्रीभागवत पंचम स्कंध (M-55)

लेखक / लिपीकार –

पृठ 73 काळ – पूर्ण / [✓ अपूर्ण]

॥ अथश्रीभागवतपंचमस्कंधप्रारंभः ॥

छ

श्रीगणेशायनमः॥ ॥ॐ नमःश्रीपरमहंसास्वादितचरणचिन्मकरंदायभक्तज
नमानसनिवासायश्रीरामाय॥ १॥ अथातःपंचमस्कंधव्याख्यानेकविशेषवानु
॥प्रियव्रतान्वयोयत्रसप्रसंगःप्रपंच्यते॥ १॥ षड्विंशत्याधुनाध्यायैःपंचमेस्थान
मीर्यते॥ लोकद्वीपादिमर्यादापालनाख्यमनेकधा॥ २॥ पृथिव्युपर्य्यधोलोकेमर्
यादात्रिविधामता॥ पुनश्चैकैकशस्तेषुमर्यादाबहुधामता॥ ३॥ भुविद्वीपादि
मर्यादापाल्यतेराजभिःपृथक्॥ भूमेरुपरिदेवाद्यैस्ततश्चाधोसुरादिभिः॥ ४॥
तत्राध्यायैस्तुविंशत्याप्रियव्रतपुरःसरैः॥ भुवोद्वीपादिमर्यादाःपालिताइति
वर्ण्यते॥ ५॥ त्रिभिःसूर्यादिभिर्ज्योतिश्चक्रादिष्वभिकीर्त्यते॥ अतलादिषुदैत्या
द्यैःपालनंचततस्त्रिभिः॥ ६॥ तत्रतुप्रथमेऽध्यायेज्ञानिनोराज्यनिर्वृतिः॥ पुनश्चशा

ननिष्ठेतिप्रियव्रतकथाश्रुता॥वंशंप्रियव्रतस्यापिनिबोधनृपसत्तम॥योनार
दादात्मविद्यामधिगम्यपुनर्महीं॥भुक्त्वाविभज्यपुत्रेभ्यऐश्वरंसमगात्पदं॥९॥
श्रीराजोवाच॥प्रियव्रतोभागवतआत्मारामःकथंमुने॥गृहेरमतयन्मूलःकर्म
बंधःपराभवः॥१॥ननूनंमुक्तसंगानांतादृशानांद्विजर्षभ॥गृहेष्वभिनिवेशोयं
पुंसांभवितुमर्हति॥२॥महतांखलुविप्रर्षेउत्तमश्लोकपादयोः॥छायानिर्वृत
चित्तानांनकुटुंबेस्पृहामतिः॥३॥संशयोयंमहान्ब्रह्मन्दारागारसुतादिषु
॥सक्तस्ययत्सिद्धिरभूत्कृष्णेचमतिरच्युता॥४॥श्रीशुकउवाच॥बाढमुक्तंभग
वतउत्तमश्लोकस्यश्रीमच्चरणारविंदमकरंदरस॥आवेशितचेतसोभागवत
परमहंसदयितकथांकिंचिदंतरायविहताःस्वांशिवतमांपदवींप्रायेणनहि

न्वंति॥५॥यर्हिवावहराजन्सराजपुत्रःप्रियव्रतःपरमभागवतोनारदस्यचरणोप
सेवयांजसावगतपरमार्थसतत्वोब्रह्मसत्रेणदीक्षिष्यमाणोवनितलपरिपाल
नायाम्नातप्रवरगुणगणैकांतभाजनतयास्वपित्रोपामंत्रितोभगवतिवासु
देवएवाऽव्यवधानसमाधियोगेनसमावेशितसकलकारकक्रियाकलापो
नैवाभ्यनंदद्यद्यपितदप्रत्याम्नातव्यंतदधिकरणआत्मनोऽन्यस्मादसतोपि
पराभवमन्वीक्षमाणः॥अथहभगवानादिदेवएतस्यगुणविसर्गस्यपरिबृंहणा
नुध्यानव्यवसितसकलजगदभिप्रायआत्मयोनिरखिलनिगमनिजगणपरिवे
ष्टितःस्वभवनादवततार॥७॥सतत्रतत्रगगनतलउडुपतिरिवविमानावलिभि
रनुपथममरपरिवृढैरभिपूज्यमानःपथिपथिचवरूथशःसिद्धगंधर्वसाध्य

चारणमुनिगणैरुपगीयमानोगंधमादनद्रोणीमवभासयन्नुपससर्प॥८॥
तत्रहवाएनंदेवर्षिर्हंसयानेनपितरंभगवंतंहिरण्यगर्भमुपलभमानः॥सह
सैवोत्थायार्हणेनसहपितापुत्राभ्यामवहितांजलिरुपतस्थे॥९॥भगवानपि
भारततदुपनीतार्हणःसूक्तवाकेनातितरामुदितगुणगणावतारसुजयः॥
प्रियव्रतमादिपुरुषस्तंसदयहासावलोकइतिहोवाच॥१०॥श्रीभगवानुवाच॥
निबोधतातेदमृतंब्रवीमिमासूयितुंदेवमर्हस्यप्रमेयं॥वयंभवस्तेततए
षमहर्षिर्वहामसर्वेविवशायस्यदिष्टं॥११॥नतस्यकश्चित्तपसाविद्यया
वानयोगवीर्येणमनीषयावा॥नैवार्थधर्मैःपरतःस्वतोवाकृतंविहंतुंत
नुभृद्विभूयात्॥१२॥भवायनाशायचकर्मकर्तुंशोकायमोहायसदाभया

य॥ सुखाय दुःखाय च देहयोगमव्यक्तदिष्टं जनतांग धत्ते॥१३॥ यद्वाचितंत्यांगु
णकर्मदामभिः सुदुस्तरैर्वत्स वयं सुयोजिताः॥ सर्वे वहामो बलिमीश्वराय प्रोता
नसीव द्विपदे चतुष्पदः॥१४॥ ईशाभिसृष्टं ह्यवरुंध्महेंग दुःखं सुखं वा गुणक
र्मसंगात्॥ आस्थाय तत्तद्यदयुंक्त नाथश्चक्षुष्मतांधा इव नीयमानाः॥ मुक्तो
पि तावद्बिभृयात्स्वदेहमारब्धमश्नन्नभिमानशून्यः॥ यथानुभूतं प्रतियात
निद्रः किं त्वन्यदेहाय गुणान्न वृंक्ते॥१६॥ भयं प्रमत्तस्य वनेष्वपि स्याद्यतः स आ
स्ते सहषट्सपत्नः॥ जितेंद्रियस्यात्मरतेर्बुधस्य गृहाश्रमः किं नु करोत्यवद्यं
१७॥ यः षट्सपत्नान्विजिगीषमाणो गृहेषु निर्विश्य यतेत पूर्वं॥ अत्येति दुर्गा
श्रित ऊर्जितारीन्क्षीणेषु कामं विचरेद्विपश्चित्॥१८॥ त्वं त्वब्जनाभांघ्रिसरो

जकोशदुर्गाश्रितोनिर्जितषट्सपत्नः॥भुंक्ष्वेहभोगान्पुरुषातिदिष्टान्विमु
क्तसंगःप्रकृतिंभजस्व॥१९॥श्रीशुकउ०॥इतिसमभिहितोमहाभागवतोभ
गवतस्त्रिभुवनगुरोरनुशासनमात्मनोलघुतयाऽवनतशिरोधरोबाढमि
तिसबहुमानमुवाह॥२०॥भगवानपिमनुनायथावदुपकल्पितापचितिःप्रि
यव्रतनारदयोरविषममभिसमीक्षमाणयोरात्मसमवस्थानमवाङ्मन
संक्षयमव्यवहृतंप्रवर्त्तयन्नगमत्॥२१॥मनुरपिपरेणैवंप्रतिसंधितम
नोरथःसुरर्षिवरानुमतेनात्मजमखिलधरामंडलस्थितिगुप्तयआस्थाप्य
स्वयमतिविषमविषयविषजलाशयाशायाउपरराम॥२२॥इतिहवावसजगती श्री
पतिरीश्वरेच्छयाधिनिवेशितकर्माधिकारोखिलजगद्बंधध्वंसनपरानुभा

वस्यभगवतआदिपुरुषस्यांघ्रियुगलानवरतध्यानानुभावेनपरिरंधितक
षायाशयोवदातोपिमानवर्द्धनोमहतांमहीतलमनुशशास॥२३॥
अथचहदुहितरंप्रजापतेर्विश्वकर्मणउपयेमेबर्हिष्मतींनाम॥तस्यामुह
वावआत्मजानात्मसमानशीलगुणकर्मरूपवीर्योदारान्दशभावयांब
भूवकन्यांचयवीयसीमूर्जस्वतींनाम॥२४॥आग्नीध्रेध्मजिह्वयज्ञबाहुम
हावीरहिरण्यरेतोघृतपृष्ठःसवनमेधातिथिवीतिहोत्रकवयइतिसर्वए
वाग्निनामानः॥२५॥एतेषांकविर्महावीरःसवनइतित्रयआसन्ऊर्ध्वरेत
सः॥तआत्मविद्यायामर्भभावादारभ्यकृतपरिचयाःपारमहंस्यमेवाश्रम
मभजन्॥२६॥तस्मिन्नुहवाउपशमशीलाःपरमर्षयःसकलजीवनिकायावा

सस्यभगवतोवासुदेवस्यभीतानांशरणभूतस्यश्रीमच्चरणारविंदावि र
तस्मरणाविगलितपरमभक्तियोगानुभावेनपरिभावितांतर्हृदयाधिगतेभग
वतिसर्वेषांभूतानांआत्मभूतेप्रत्यगात्मन्येवात्मनस्तादात्म्यमविशेषेणस
मीयुः॥२७॥अन्यस्यामपिजायायांत्रयःपुत्राआसन्नुत्तमस्तामसोरैवतइति
मन्वंतराधिपतयः॥२८॥एवंउपशमायनेषुस्वतनयेष्वथजगतीपतिर्जगती
मर्बुदान्येकादशपरिवत्सराणामव्याहताखिलपुरुषकारसारसंभृतदोर्दंड
युगलापीडितमौर्वीगुणस्तनितविरमितधर्मप्रतिपक्षोबर्हिष्मत्याश्चानुदिन
मेधमानप्रमोदप्रसरणयौषिण्यव्रीडाप्रमुषितहासावलोकरुचिरक्ष्वेल्यादि
भिःपराभूयमानविवेकइवानवबुध्यमानइवमहामनाबुभुजे॥२९॥यावदवभा

भ॰

सयतिसुरगिरिमनुपरिक्रमन्भगवानादित्योवसुधातलमर्द्धेनैवप्रतपत्यर्द्धेना
वच्छादयति॥ तदाहिभगवदुपासनोपचितातिपुरुषप्रभावस्तदनभिनंदन्सम
जवेनरथेनज्योतिर्मयेनरजनीमपिदिनंकरिष्यामीतिसप्तकृत्वस्तरणिमनुप
र्य्यक्रामद्द्वितीयइवपतंगः॥२९॥येवाउहतद्रथचरणनेमिकृतपरिखातास्तेस
प्तसिंधवआसन्॥ यतएवकृताःसप्तभुवोद्वीपाः॥३०॥जंबूप्लक्षशाल्मलिकुश
क्रौंचशाकपुष्करसंज्ञाः॥तेषांपरिमाणंपूर्वस्मात्पूर्वस्मादुत्तरउत्तरोयथासंख्यं
द्विगुणमानेनबहिःसमंततउपक्लृप्ताः॥३१॥क्षारोदेक्षुरसोदसुरोदघृतोदक्षी
रोददधिमंडोदशुद्धोदाःसप्तजलधयःसप्तद्वीपपरिखाइवाभ्यंतरद्वीपसमाना
एकैकश्येनयथापूर्वंसप्तस्वपिबहिर्द्वीपेषुपृथक्पृथक्परितउपकल्पितास्त

षुजंब्वादिषुबर्हिष्मतीपतिरनुव्रतानात्मजानाग्नीध्रेध्मजिह्वयज्ञबाहुहिरण्य
रेतोघृतपृष्ठमेधातिथिवीतिहोत्रसंज्ञान्यथासंख्येनैकैकस्मिन्नेकैकमेवाधिप
तिंविदधे ॥ ३२ ॥ दुहितरंचोर्जस्वतींनामोशनसेप्रायच्छद्यस्यामासीद्देवयानीना
मकाव्यसुता ॥ ३३ ॥ नैवंविधःपुरुषकारउरुक्रमस्यपुंसांतदंघ्रिरजसाजितषड्गुणा
नां ॥ चित्रंविदूरविगतःसकृदाददीतयन्नामधेयमधुनासजहातिबंधं ॥ ३४ ॥
सएवमपरिमितबलपराक्रमएकदातुदेवर्षिचरणानुशयनानुपतितगुणवि
सर्गसंसर्गेणानिर्वृतमिवात्मानंमन्यमानआत्मनिर्वेदइदमाह ॥ ३५ ॥ अहोअ
साध्वनुष्ठितंयदभिनिवेशितोहमिंद्रियैरविद्यारचितविषमविषयांधकूपेतदल
मलमनुष्यावनितायाविनोदमृगंमांधिग्धिगितिगर्हयांचकार ॥ ३६ ॥ परदेवता

प्रसादाधिगतात्मप्रत्यवमर्शेनानुप्रवृत्तेभ्यःपुत्रेभ्यइमांयथादायंविभज्यभुक्तभोगां
चमहिषींमृतकमिवसहमहाविभूतिमपहायस्वयंनिहितनिर्वेदोहृदिगृहीतहरिवि
हारानुभावोभगवतोनारदस्यपदवींपुनरेवानुससार॥तस्यहवाएतेश्लोकाःप्रिय
व्रतकृतंकर्मकोनुकुर्याद्विनेश्वरं॥योनेमिनिम्नैरकरोच्छायांघ्नन्सप्तवारिधी
न्॥३८॥भूसंस्थानंकृतंयेनसरिद्गिरिवनादिभिः॥सीमाचभूतनिर्वृत्यैद्वीपेद्वी
पेविभागशः॥३९॥भौमंदिव्यंमानुषंचमहित्वंकर्मयोगजं॥यश्चक्रेनिरयौपम्यं
पुरुषानुजनप्रियः॥४०॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभुवनकोशप्रि
यव्रतविजयेप्रथमोऽध्यायः॥द्वितीयेप्रोक्तमाग्नीध्रचरितंस्तोत्रेणसंमतं॥पत्न्यांहिपूर्ववि
त्त्यांयोनाभिमुख्यानजीजनत्॥१॥अस्मिन्वंशेप्रसिद्धोयमाग्नीध्रःस्तोत्रेणपुंग

वः॥विहसन्निवतस्येदंचरितंमुनिरब्रवीत्॥२॥श्रीशुकउवाच॥एवंपितरिसं
प्रवृत्तेतदनुशासनेवर्त्तमानआग्नीध्रोजंबूद्वीपौकसःप्रजाऔरसवद्धर्मावे
क्षमाणःपर्यगोपायत्॥१॥सचकदाचित्पितृलोककामःसुरवरवनिताक्री
डाचलद्रोण्यांभगवंतंविश्वसृजांपतिमाभृतपरिचर्योपकरणआत्मैकाग्र्ये
णतपस्वीआराधयांबभूव॥२॥तदुपलभ्यभगवानादिपुरुषःसदसिगायंतीं
पूर्वचित्तिंनामाप्सरसमभियापयामास॥३॥अयिगच्छपूर्वचित्तेप्रियव्रतंम
मवच्चसाप्रलोभयेतिप्रजापतिनाप्रेषिताद्भुततरमाजगाम॥साचत
दाश्रमोपवनमतिरमणीयंविविधनिबिडविटपविटपिनिकरसंश्लिष्टपु

॥भा॰ पं॰॥
॥७॥

रटलतारूढच्छलविहंगममिथुनैःप्रोच्यमानश्रुतिभिःप्रतिबोध्यमानसलि
लकुक्कुटकारंडवकलहंसादिभिर्विचित्रमुपकूजितामलजलाशयकमला
करमुपबभ्राम॥४॥तस्याःसुललितगमनपदविन्यासगतिविलासायाश्चा
नुपदंखणखणायमानरुचिरचरणाभरणस्वनमुपाकर्ण्यनरदेवकुमारः
समाधियोगेनामीलितनयननलिनमुकुलयुगलमीषद्विकचय्यव्यचष्ट
॥५॥तामेवाविदूरेमधुकरीमिवसुमनसउपजिघ्रंतींदिविजमनुजमनोनयना
ह्लादउच्चैर्गतिविहारविनयावलोकसुखरौंवयवैर्मनसिनृणांकुसुमायुधस्य
विदधतींविवरं॥६॥निजमुखविगलितामृतासवसहासभाषणामोदमदांध
मधुकरनिकरोपरोधेनद्रुतपदविन्यासेनवल्गुस्पंदनस्तनकलशाकबरभारर

अ॰ २
स्रा
॥राम॰॥
॥७॥

शनांदेवींतदवलोकनेनविह्वतावसरस्यभगवतोमकरध्वजस्यवशमुपनीतोज
डवदितिहोवाच॥६॥कात्वंचिकीर्षसिचकिंमुनिवर्यशैलेमायासिकापिभगवत्य
रदेवतायाः॥विज्येबिभर्षिधनुषीसुहृदात्मनोर्थेकिंवामृगान्मृगयसेविपिने
प्रमत्तान्॥७॥बाणाविमौभगवतःशातपत्रपत्रौशांतावपुंखरुचिरावतितिग्मदं
तौ॥कस्मैयुयुत्ससिवनेविचरन्नविभ्रःक्षेमायनोजडधियांतवविक्रमोस्तु॥८॥
शिष्याइमेभगवतःपरितःपठंतिगायंतिसामसरहस्यमजस्रमीशां॥युष्मच्छिखा
विलुलिताःस्ममनोभिदृष्टीःसर्वेभजंत्यृषिगणाइववेदशाखाः॥९॥वाचंपरंचर
णपंजरतित्तिरीणांब्रह्मन्नरूपमुखराश्शृणवामतुभ्यं॥लब्धाकुदंबरुचिरंकु
विटंकबिंबेयस्यामलातपरिधिःकुचवल्कलंते॥१०॥किंसंभृतंरुचिरयोर्द्विज

शृंगयोस्तेमध्येकृन्नोवहसियत्रहृद्भिः श्रितामे ॥ पंकोरुणःस्फुरभिरात्मविषाणई
हृक्ष्येनाश्रमंस्फुभगमेसुरभीकरोषि ॥ ११ ॥ लोकंप्रदर्शयस्फुहृत्तमतावकंमेयत्र
त्यइत्थमुरसावयवावपूर्वौ ॥ अस्मद्विधस्यमनउन्नयनौबिभर्तिबद्धमुतंसर
सरासमसुधादिवङ्के ॥ १२ ॥ कावात्महृत्तिरदनाद्धविरंगवातिविस्मोःकलास्यनिमि
षोन्मकरोचकर्णौ ॥ उद्विग्नमीनयुगलंद्विजपंक्तिर्ग्गोचिरासन्नभृंगनिकरंसरइस्तु
स्वंते ॥ १३ ॥ योसौत्वयाकरसरोजहतःपतंगोदिक्षुभ्रमनूभ्रमतएजयतेक्षिणीमि
॥ मुक्तंनतेस्मरसिवक्रजदावहृद्यंकषोनिलोहरतिलंपटएषनीवीं ॥ १४ ॥
रूपंतपोधनतपश्चरतांतपोग्र्यंह्येतत्तुकेनतपसाभवतोपलब्धं ॥ त्वंतुतपोहि
सिमयासहमित्रमर्घ्यंकिंवाप्रसीदतिसवैभवभावनोमे ॥ १५ ॥ नत्वांत्यजामिद

॥ एम॰ ॥
॥ ८ ॥

यितंद्विजदेवदत्तंयस्मिन्मनोदृगपिनोनवियातिलग्नं॥मांचारुशृंग्यर्हसि
नेतुमनुव्रतंतेचित्तंयतःप्रतिसरंतुशिवाःसचिव्यः॥१६॥इतिललनानुनयाति
विशारदोग्राम्यवैदग्धयापरिभाषयातांविबुधवधूंविबुधमतिरधिसभाज
यामास॥१७॥साचततस्तस्यवीरयूथपतेर्बुद्धिशीलरूपवयःश्रियोदार्येणपरा
क्षिप्तमनास्तेनसहायुतायुतपरिवत्सरोपलक्षणंकालंजंबूद्वीपपतिनाभौम
स्वर्गभोगान्बुभुजे॥१८॥तस्यामुहवाआत्मजान्सराजवरआग्नीध्रोनाभिकिंपुरु
षहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान्नवपुत्रानजन
यत्॥सासूत्वाथसुतान्नवानुवत्सरंगृहएवापहायपूर्वचित्तिर्भूयएवाजंदेव
मुपतस्थे॥१९॥आग्नीध्रसुतास्तेमातुरनुग्रहादोत्पत्तिकेनैवसंहननबलोपेताः

पित्राविभक्ताआत्मतुल्यनामानियथाभागंजंबूद्वीपवर्षाणिबुभुजुः॥२०॥आग्नी
ध्रोराजातृप्तःकामानामप्सरसमेवानुदिनमधिमन्यमानस्तस्याःसलोकतांश्रु
तिभिरवारुंधयत्रपितरोमादयंते॥२१॥संपरेतेपितरिनवभ्रातरोमेरुदुहितॄ
र्मेरुदेवींप्रतिरूपामुग्रदंष्ट्रींलतांरम्यांश्यामांनारींभद्रांदेववीतिमितिसंज्ञा
नवोदवहन्॥२२॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेआग्नीध्रवर्णनो
नामद्वितीयोऽध्यायः॥ ॥३॥ तृतीयेचरितंनाभेःपरंमंगलमीर्यते॥यस्ययज्ञे
प्रतीतःसन्पुत्रोभूदृषभोहरिः॥१॥श्रीशुकउवाच॥नाभिरपत्यकामोप्रजया
मेरुदेव्याभगवंतंयज्ञपुरुषमवहितात्मायजत॥१॥तस्यहवावश्रद्धयाविशु
द्धभावेनयजतःप्रवर्ग्येषुप्रचरत्सुद्रव्यदेशकालमंत्रर्त्विग्दक्षिणाविधानयो

गोपपत्याद्दुरधिगमोपिभगवान्भागवतवात्सल्यतयासुप्रतीकआत्मानम
पराजितंनिजजनाभिप्रेतार्थविधित्सयागृहीतहृदयोहृदयँमनोनयनानंद गयं २
नावयवाभिराममाविश्चकार॥१॥अथहतमाविष्कृतभुजयुगलद्वयंहिरण्म
यंपुरुषविशेषंकपिशकौशेयांबरधरमुरसिविलसत्श्रीवत्सललामंदरव
रवनरुहवनमालाछूर्यमृतमणिगदाँभिरुपलक्षितं॥३॥स्फुटकिरणप्रवर दि ५
मणिमयमुकुटकुंडलकटककटिसूत्रहारकेयूरनूपुराद्यंगभूषणविभूषित
मृत्विक्सदस्यगृहपतयोधनाइवोत्तमधनमुपलभ्यसबहुमानमर्हणेनावन
तशीर्षाणउपतस्थुः॥४॥अर्हसिमुहुरर्हत्तमार्हणमस्माकमनुपथानांनमोनम
इत्येतावत्सदुपशिक्षितं॥कोर्हतिपुमान्प्रकृतिगुणव्यतिकरमतिरनीशईश्व

रस्यपरस्यपरस्यप्रकृतिपुरुषयोरर्वाक्तनाभिर्नामरूपाकृतिभिःस्वरूपनिरूपणं
॥५॥ सकलजननिकायवृजिननिरसनशिवतमप्रवरगुणगणैकदेशकथनादृ
ते ॥६॥ परिजनानुरागविरचितशबलसंशब्दसलिलसितकिसलयतुलसिकादू
र्वांकुरैरपिसंभृतयासपर्य्ययाकिलपरमपरितुष्यसि ॥७॥ अथानयापिनभवत
ईज्ययोरुभारभरयासमुचितमर्थमिहोपलभामहे ॥८॥ आत्मनएवानुसवनमं
जसाबोभूयमानाशेषपुरुषार्थस्वरूपस्यकिंतुनाथाशिषआशासानानामे
तदभिसंराधनमात्रंभवितुमर्हति ॥९॥ तद्यथाबालिशानांस्वयमात्मनःश्रेयःप
रमविदुषांपरमपरमपुरुषप्रकर्षकरुणयास्वमहिमानंचापवर्गाख्यमुपक
ल्पयिष्यन्स्वयंनापचितएवेतरवदिहोपलक्षितः ॥१०॥ अथायमेववरोह्यर्ह

तम्यर्हिबर्हिषिराजर्षेर्वरदर्षभोभवान्निजपुरुषेक्षणविषयआसीत्॥११॥
असंगनिशितज्ञानानलविधूताशेषमलानांभवत्स्वभावानामात्मारामाणांमु
नीनामनवरतपरगुणितगुणगणपरममंगलायनगुणगणकथनोसि॥१२॥अथ
कथंचित्स्खलनक्षुतपतनजृंभणदुरवस्थानादिषुविवशानांनःस्मरणायज्वरम
रणदशायामपिसकलकश्मलनिरसनानितवगुणकृतनामधेयानिवच
नगोचराणिभवंतु॥१३॥किंचायंराजर्षिरपत्यकामःप्रजांभवादृशीमाशासानई
श्वरमाशिषांस्वर्गापवर्गयोरपिभगवंतमुपधावतिप्रजायामर्थप्रत्ययोधन
दइवाधनःफलीकरणं॥१४॥कोवाइहतेपराजितोपराजितयामाययानवसि
तपदव्यानावृतमतिर्विषयविषरयानावृतप्रकृतिरनुपासितमहच्चरणः॥१५॥

यदुह वाव तव पुनरदभ्रकर्त्तरिह समाहूतस्तत्रार्थधियां मंदानां नस्तद्यद्देव
हेलनं देवदेवार्हसि साम्येन सर्वान्प्रतिबोद्धुमविदुषां ॥१६॥ इति निगदेनाभिष्टू
यमानो भगवाननिमिषर्षभो वर्षधराभिवंदितचरणः सदयमिदमाह वादिताभि
१७ ॥श्रीभगवानु॰॥ अहो बताहमृषयो भगवद्भिरवितथगीर्भिर्वरमसुलभम
भियाचितो यदमुष्यात्मजो मया सदृशो भूयादिति ममाहमेवाभिरूपः कै
वल्याद्यथापि ब्रह्मवादो न मृषा भवितुमर्हति ममेव हि मुखं यद्द्विजदे
वकुलं ॥१८॥ ततः आग्नीध्रीयेंशकलयावतरिष्यामि आत्मतुल्यमनुप
लभमानः ॥१९॥ इति निशामयंत्या मेरुदेव्याः पतिमभिधायांतर्दधे भगवा
न्बर्हिषि तस्मिन्नेवं विष्णुदत्त भगवान्परमर्षिभिः प्रसादितो नाभेः प्रिय

चिकीर्षयातदवरोधायनेमेरुदेव्यांधर्मान्दर्शयितुकामोवातरशनानां
श्रमणानामृषीणामूर्द्धमंथिनांशुक्लयातनुवावततार॥२०॥ ॥इतिश्री
भागवतेमहापुराणेपंचमस्कंधेतृतीयोऽध्यायः॥३॥चतुर्थादित्रिभिःप्रोक्तेमृषभ
स्येहितंमहत्॥ लोकार्थंयेनसत्कर्मनैष्कर्म्यंचनिदर्शितं॥१॥चतुर्थेज्ञा
तपुत्रस्यराज्यंतस्योपवर्ण्यते॥यस्यराज्येजनःसर्वःसंतोषामृतनिर्वृतः
२॥श्रीशुकउवाच॥अथतमुत्पत्त्यैवाभिव्यज्यमानभगवल्लक्षणंसाम्यो
पशमवैराग्यैश्वर्यमहाविभूतिभिरनुदिनमेधमानानुभावंप्रकृतयःप्रजा
ब्राह्मणादेवताश्चावनितलसमवनायातितरांजगृधुः॥१॥तस्यहवाइत्थंव
र्ष्मणावरीयसाबृहच्छ्लोकेनचओजसाबलेनश्रियायशसावीर्यशौर्याभ्यां

चपिताऋषभइतीदंनामचकार॥२॥यस्यहींद्रःस्पर्द्धमानोभगवान्वर्षेनववर्ष
तदवधार्य्यभगवानृषभदेवोयोगेश्वरःप्रहस्यात्मयोगमाययास्ववर्षमज
नाभंनामाभ्यवर्षत्॥३॥नाभिस्तुयथाभिलषितंसुप्रजास्त्वमवरुध्याति
प्रमोदभरविह्वलोगद्गदाक्षरयागिरास्वैरंगृहीतनरलोकसधर्मंभगवंतं
पुराणपुरुषंमायाविलसितमतिर्वत्सतातेतिसानुरागमुपलालयन्परांनिर्वृ
तिमुपगतः॥४॥विदितानुरागमापौरप्रकृतिजनपदोराजानाभिरात्मजंसमय
सेतुरक्षायामभिषिच्यब्राह्मणेषूप~~निप~~निधायसहमेरुदेव्याविशालायांप्रस
न्ननिपुणेनतपसासमाधियोगेननरनारायणाख्यंभगवंतंवासुदेवमुपासी
नःकालेनतन्महिमानमवाप॥५॥यस्यहपांडवेयश्लोकावुदाहरंति॥कोनुतत्क

मराजर्षेर्नाभेरन्वाचरेत्पुमान् ॥ अपत्यतामगाद्यस्य हरिः शुद्धेन कर्मणा ॥६॥
ब्रह्मण्योन्यः कुतो नाभेर्विप्रा मंगलपूजिताः ॥ यस्य बर्हिषि यज्ञेशं दर्शयामासु
रोजसा ॥७॥ अथ ह भगवानृषभदेवः स्ववर्षं कर्मक्षेत्रं अनुमन्यमानः ॥ प्रदर्शित
गुरुकुलवासो लब्धवरैर्गुरुभिरनुज्ञातो गृहमेधिनां धर्माननुशिक्षमाणो जयंत्या
मिंद्रदत्तायामुभयलक्षणं कर्म समाम्नायाम्नातमभियुंजन्नात्मजानामात्म
समानानां शतं जनयामास ॥८॥ येषां खलु महायोगी भरतो ज्येष्ठः श्रेष्ठगुण आ
सीत्येनेदं वर्षं भारतमिति व्यपदिशंति ॥९॥ तमनु कुशावर्त इलावर्तो ब्रह्मा
वर्तो मलयः केतुर्भद्रसेन इंद्रस्पृक् विदर्भः कीकट इति नव नवति प्रधानाः ॥१०॥
कविर्हरिरंतरिक्षः प्रबुद्धः पिप्पलायनः ॥ आविर्होत्रोथ द्रुमिडश्चमसः करभा

वि

जनः॥४१॥इतिभागवतधर्मदर्शनानवमहाभागवतास्तेषांसुचरितंभगवन्म
हिमोपबृंहितंवसुदेवनारदसंवादमुपशमायनमुपरिष्टाद्वर्णयिष्यामः॥११॥
यवीयांसएकाशीतिर्जायंतेयाःपितुरादेशकरामहाशालीनामहाश्रोत्रियायज्ञ
शीलाःकर्मविशुद्धाब्राह्मणाबभूवुः॥१२॥भगवानृषभसंज्ञआत्मतंत्रःस्वयंनित्य
निवृत्तानर्थपरंपरःकेवलानंदानुभवईश्वरएवविपरीतवत्कर्माण्यारभमाणःका
लेनानुगतंधर्ममाचरणेनोपशिक्षयन्नतद्विदांसमउपशांतोमैत्रःकारुणिको
धर्मार्थयशःप्रजानंदामृतावरोधेनगृहेषुलोकंन्यरमयत्॥१३॥यद्यच्छीर्षण्याच
रितंतत्तदनुवर्त्ततेलोकः॥१४॥यद्यपिस्वविदितंसकलधर्मंब्राह्मंगुह्यंब्राह्मणेर्द
र्शितमार्गेणसामादिभिरुपायैर्जनतामनुशशास॥१५॥द्रव्यदेशकालवयःश्र

द्धर्त्विग्विविधोद्देशोपचितैः सर्वैरपि क्रतुभिर्यथोपदेशं शतकृत्व इयाज॥१६
भगवतर्षभेण परिरक्ष्यमाण एतस्मिन्वर्षे न कश्चन पुरुषो वांछत्यविद्यमान
मिवात्मनोन्यस्मात्कथंचन किमपि कर्हिचिदवेक्षते भर्त्तर्य्यनुसवनं विजृंभि
तस्नेहातिशयमंतरेण॥१७॥ स कदाचिदटमानो भगवानृषभो ब्रह्मावर्त्तग
तो ब्रह्मर्षिप्रवरसभायां प्रजानां निशामयंतीनामात्मजानवहितात्मनः
प्रश्रयप्रणयभरसुयंत्रितानप्युपशिक्षयन्निति होवाच॥१८॥ ॥इति
श्रीभागवते महापुराणे पंचमस्कंधे ऋषभदेवानुचरिते चतुर्थोध्यायः॥
४॥ ॥पंचमे मोक्षधर्मोपदेशः पुत्रानुशासनं॥ उक्तं पारमहंस्यं च तस्य
द्वंद्वतितिक्षया॥१॥ ऋषभ उवाच॥ नायं देहो देहभाजां नृलोके कष्टान्का

मानर्हतेविड्भुजांये॥तपोदिव्यंपुत्रकायेनसत्वंशुद्ध्येद्यस्माद्ब्रह्मसौख्यंत्वनंतं
॥१॥महत्सेवांद्वारमाहुर्विमुक्तेस्तमोद्वारंयोषितांसंगिसंगं॥महांतस्तेसम
चित्ताःप्रशांताविमन्यवःसुहृदःसाधवोये॥२॥येवामयीशेकृतसौहृदार्थाज
नेषुदेहंभरवार्त्तिकेषु॥गृहेषुजायात्मजरातिमत्सुनप्रीतियुक्तायावदर्थाश्च
लोके॥३॥नूनंप्रमत्तःकुरुतेविकर्मयदिंद्रियप्रीतयआपृणोति॥नसाधुमन्येय
तआत्मनोयमसन्नपिक्लेशदआसदेहः॥४॥पराभवस्तावदबोधजातोयाव
न्नजिज्ञासतआत्मतत्वं॥यावत्क्रियास्तावदिदंमनोवैकर्मात्मकंयेनशरीरबं
धः॥५॥एवंमनःकर्मवशंप्रयुंक्तेअविद्ययात्मन्युपधीयमाने॥प्रीतिर्नयावन्मयि
वासुदेवेनमुच्यतेदेहयोगेनतावत्॥६॥यदानपश्यत्ययथागुणेहांस्वार्थेप्र

मत्तःसहसाविपश्चित्॥गतस्मृतिर्विंदतितत्रतापानासाद्यमैथुन्यमगारमज्ञः
॥७॥पुंसःस्त्रियामिथुनीभावमेतंतयोर्मिथोहृदयग्रंथिमाहुः॥अतोगृहक्षेत्र
सुताप्तवित्तैर्जनस्यमोहोयमहंममेति॥८॥यदामनोहृदयग्रंथिरस्यकर्मानुब
द्धोदृढआश्लथेत॥तदाजनःसंपरिवर्त्ततेस्मान्मुक्तःपरंयात्यतिहायहेतुं॥९॥
हंसेगुरौमयिभक्त्यानुवृत्त्यावितृष्णयाद्वंद्वतितिक्षयाच॥सर्वत्रजंतोर्व्यसनाव
गत्याजिज्ञासयातपसेहानिवृत्त्या॥१०॥मत्कर्मभिर्मत्कथयाचनित्यंमद्देवसं
गाद्गुणकीर्त्तनान्मे॥निर्वैरसाम्योपशमेनपुत्राजिहासयादेहगेहात्मबुद्धेः॥११॥
॥अध्यात्मयोगेनविविक्तसेवयाप्राणेंद्रियात्माभिजयेनसध्र्यक्॥सच्छ्रद्धयाब्र
ह्मचर्येणशश्वदसंप्रमादेनयमेनवाचां॥१२॥सर्वत्रमद्भावविचक्षणेनज्ञानेन

विज्ञानविराजितेन॥ योगेनधृत्युद्यमसत्वयुक्तोलिंगंव्यपोहेत्कुशलोहमाख्यं
॥१३॥ कर्माशयंहृदयग्रंथिबंधमविद्ययासादितमप्रमत्तः॥ अनेनयोगेन
यथोपदेशंसम्यग्व्यपोह्योपरमेतयोगात्॥१४॥ पुत्रांश्चशिष्यांश्चनृपोगुरु
र्वामल्लोककामोमदनुग्रहार्थः॥ इत्थंविमन्युरनुशिष्यादतज्ज्ञान्नयोजये
त्कर्मसुकर्ममूढान्॥१५॥ कंयोजयन्मनुजोर्थंलभेतनिपातयन्नष्टदृशंहि
गर्ते॥ लोकःस्वयंश्रेयसिनष्टदृष्टिर्योर्थान्समीहेतनिकामकामः॥ अन्योन्यवै
रःसुखलेशहेतोरनंतदुःखंचनवेदमूढः॥१६॥ कस्तंस्वयंतदभिज्ञोविपश्चिद
विद्यायामंतरेवर्त्तमानं॥ दृष्ट्वापुनस्तंसघृणःकुबुद्धिंप्रयोजयेदुत्पथगंयथां
धं॥१७॥ गुरुर्नसस्यात्स्वजनोनसस्यात्पितानसस्याज्जननीनसास्यात्॥ दैवंन

तत्स्यान्नपतिश्चसस्यान्नमोचयेद्यःसमुपेतमृत्युं॥१८॥इदंशरीरंममदुर्वि
भाव्यंतत्वंहिमेहृदयंयत्रधर्मः॥पृष्ठेकृतोमेयदधर्मआरादतोहिमामृषभंप्रा
हुरार्याः॥१९॥तस्माद्भवंतोहृदयेनजाताःसर्वेमहीयांसममुंसनाभं॥अक्लि
ज ष्टबुद्ध्याभरतंभ[illegible]ध्वंशुश्रूषणंतद्भरणंप्रजानां॥२०॥भूतेषुवीरुद्भ्यउदुत्तमायेस
रीसृपास्तेषुसबोधनिष्ठाः॥ततोमनुष्याःप्रमथास्ततोपिगंधर्वसिद्धाविबु
धानुगाये॥२१॥देवासुरेभ्योमघवत्प्रधानादक्षादयोब्रह्मसुतास्तुतेषां॥भ
वःपरःसोथविरिंच्यवीर्यःसमत्परोहंद्विजदेवदेवः॥नब्राह्मणेस्तुलयेभूतम
न्यत्पश्यामिविप्राःकिमतःपरंतु॥यस्मिन्नृभिःप्रहुतंश्रद्धयाहमश्नामिकामं
नतथाग्निहोत्रे॥२३॥धृतातनूरुशतीमेपुराणीयेनेहसत्वंपरमंपवित्रं॥श

मोदमःसत्यमनुग्रहश्चतपस्तितिक्षानुभवश्चयत्र॥२४॥मत्तोप्यनंतात्परतः
परस्मात्स्वर्गापवर्गाधिपतेर्नकिंचित्॥येषांकिमुस्यादितरेणतेषामकिंचनानां
मयिभक्तिभाजां॥२५॥सर्वाणिमद्धिष्ण्यतयाभवद्भिश्चराणिभूतानिसुताध्रु
वाणि॥संभावितव्यानिपदेपदेवोविविक्तदृग्भिस्तदुहार्हणंमे॥२६॥मनोवचो
दृक्करणेहितस्यसाक्षात्कृतंमेपरिबर्हणंहि॥विनापुमान्येनमहाविमोहा
त्कृतांतपाशान्नविमोक्तुमीशेत॥२७॥श्रुकउवाच॥एवमनुशास्यात्मजा
न्स्वयमनुशिष्टानपिलोकानुशासनार्थंमहानुभावःपरमसुहृद्भगवानृ
षभापदेशउपशमशीलानामुपरतकर्मणांमहामुनीनांभक्तिज्ञानवैरा
ग्यलक्षणंपारमहंस्यधर्ममुपशिक्षमाणःस्वतनयशतज्येष्ठंपरमभाग

वतंभगवज्जनपरायणंभरतंधरणितलपरिपालनायाभिषिच्यस्वयंभ
वनएवोर्वरितशरीरमात्रपरिग्रहउन्मत्तइवगगनपरिधानःप्रकीर्णकेश
आत्मन्यारोपिताहवनीयोब्रह्मावर्त्तात्प्रवव्राज॥२८॥जडांधमूकबधिरपि
शाचोन्मादकवदवधूतवेषोभिभाष्यमाणोपिजनानांगृहीतमौनव्रतस्तू
ष्णींबभूव॥२९॥तत्रतत्रपुरग्रामाकरखेटवाटिशिबिरव्रजघोषसार्थगिरि
वनाश्रमादिष्वनुपथमवनिचरापसदैःपरिभूयमानोमक्षिकाभिरिववन
गजस्तर्जनताडनावमेहनष्ठीवनग्रावशकृद्रजःप्रक्षेपपूतिवातदुरुक्तैस्तद
विगणयन्नेवासत्संस्थानएतस्मिन्देहोपलक्षणेसदपदेशउभयानुभवस्वरू
पेणस्वमहिमावस्थानेनासमारोपिताहंममाभिमानत्वादखंडितमनाःपृथि

॥भा॰पं॰॥
॥१७॥

वीमेकचरःपरिबभ्राम ॥२९॥ अतिसुकुमारकरचरणोरःस्थलविपुलबाह्वं
सगलवदनाद्यवयवविन्यासःप्रकृतिसुंदरःस्वभावहाससुमुखोनवनलि
नदलायमानशिशिरतारारुणायतनयनरुचिरःसदृशसुभगकपोलकर्ण
कंठनासोविगूढस्मितवदनमहोत्सवेनपुरवनितानांमनसिकुसुमशरा
सनमुपदधानःपरागवलंबमानकुटिलजटिलकपिशकेशभूरिभारो
वधूतमलिननिजशरीरेणग्रहगृहीतइवादृश्यत ॥३०॥ यर्हिवावसभगवान्
लोकमिमंयोगस्याद्धाप्रतीपमिवाचक्षाणस्तत्प्रतिक्रियाकर्मबीभत्सित
मितिव्रतमाजगरमास्थितःशयानएवाश्नातिपिबतिखादत्यवमेहतिह
दतिस्मचेष्टमानउच्चरितआदिग्धोद्देशः ॥३१॥ तस्यहयःपुरीषसुरभिसौ

अ॰५
न

॥राम॰॥
॥१७॥

गंध्यवायुस्तं देशं दशयोजनं समंतात्सुरभिं चकार ॥३३॥ एवं गोमृगकाकचर्यया व्रजंस्तिष्ठन्नासीनः शयानः काकगोमृगचरितः पिबति खादत्यवमेहति स्म ॥३४॥ इति नानायोगचर्याचरणो भगवान्कैवल्यपतिरृषभो विरतपरममहानंदानुभव आत्मनि सर्वेषां भूतानामात्मभूते भगवति वासुदेवे आत्मनोव्यवधानानंतरोदरभावेन सिद्धसमस्तार्थपरिपूर्णो योगेश्वर्याणि वेहायसमनोजवांतर्धानपरकायप्रवेशदुरग्रहणादीनि यदृच्छयोपगतानि नांजसा नृप हृदयेनाभ्यनंदत् ॥३५॥ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ऋषभचरिते पंचमोऽध्यायः ॥ ॥५॥

षष्ठे लीलाभिमानस्य देहत्यागक्रमाभिधा ॥ प्रदहंतं दवाग्निं यः पश्यन्न

पिनपश्यन्ति ॥ १ ॥ श्रीराजोवाच ॥ ननूनंभगवन्नात्मारामाणांयोगसमीरितज्ञा
नावभर्जितकर्मबीजानामैश्वर्याणिपुनःक्लेशदानिभवितुमर्हंतियदृछयोप
गतानि ॥ १ ॥ ऋषिरुवाच ॥ सत्यमुक्तंकिंत्विहवाएकेनमनसोद्धाविश्रंभमनव
स्थानस्यशठकिरातइवसंगछंते ॥ तथाचोक्तं ॥ नकुर्यात्कर्हिचित्सख्यंमन
सिह्यनवस्थिते ॥ यद्विश्रंभाच्चिराच्चीर्णंचस्कंदतपऐश्वरं ॥ २ ॥ नित्यंददातिका
मस्यछिद्रंतमनुयेरयः ॥ योगिनःकृतमैत्रस्यपत्युर्जायेवपुंश्चली ॥ ३ ॥ कामोम
न्युर्मदोलोभःशोकमोहभयादयः ॥ कर्मबंधश्चयन्मूलःस्वीकुर्यात्कोनुतद्बुधः
४ ॥ अथैवमखिललोकपालललामोविलक्षणैर्ज्जडवैधूतवेषभाषाचरिते
रविलक्षितभगवत्प्रभावोयोगिनांसांपरायविधिमनुशिक्षयन्स्वकलेवरंजिहा

दव २

१९

करणआत्मन्यात्मानमसंव्यवहितमनर्थांतरभावेनान्वीक्षमाणउपरतानुवृत्ति
रुपरराम॥५॥तस्यहवाएवंमुक्तलिंगस्यभगवतऋषभस्ययोगिनःयोगमायावा
सनयादेहइमांजगतीमभिमानाभासेनचंक्रममाणः॥६॥कोंकवेंककुटकान्द
क्षिणकर्णाटकान्देशान्यदृच्छयोपगतःकुटकाचलोपवनआस्यकृताश्म
कवलउन्मादइवमुक्तमूर्द्धजोसंवीतएवविचचार॥७॥अथसमीरवेगविधूत
वेणुविघर्षणजातोग्रदावानलस्तद्वनमालेलिहानःसहतेनददाह॥८॥य
स्यकिलानुचरितमुपाकर्ण्यकोंकवेंककुटकानांराजार्हन्नामोपशिक्ष्यकला
वधर्मउत्कृष्यमाणेभवितव्येनविमोहितःस्वधर्मपथमकुतोभयमपहायकु
पथपाषंडमसमंजसंनिजमनीषयामंदःप्रवर्त्तयिष्यते॥९॥येनहवावकलौम

नुजापसदादेवमायामोहिताःस्वविधिनियोगशौचचारित्रविहीनादेवहेलना
न्यपव्रतानिनिजनिजेछ्यागृह्णानाअस्नानानाचमनाशौचकेशोल्लुंचना
दीनिकलिनाधर्मबहुलेनोपहतधियोब्रह्मब्राह्मणयज्ञपुरुषलोकविदूष
काःप्रायेणभविष्यंति॥१०॥तेचह्यर्वाक्तनयानिजलोकयात्रयांधपरंपरया
श्वस्तास्तमस्यंधेस्वयमेवप्रपतिष्यंति॥११॥अयमवतारोरजसोपप्लुतकै
वल्योपशिक्षणार्थः॥तस्यानुगुणान्श्लोकान्गायंति॥१२॥अहोभुवःस
प्तसमुद्रवत्याद्वीपेषुवर्षेष्वधिपुण्यमेतत्॥गायंतियत्रत्यनामुरारेःकर्माणि
भद्राण्यवतारवंति॥१३॥अहोनुवंशोयशसावदातःप्रैयव्रतोयत्रपुमान्पुराणः
कृतावतारःपुरुषःसआद्यश्चचारधर्मंयदकर्महेतुं॥१४॥कोन्वस्यकाष्ठामप

रोनुगच्छेन्मनोरथेनाप्यभवस्ययोगी ॥ योयोगमायाःस्पृहयत्युदस्ताह्यस
त्तयायेनकृतप्रयत्नाः ॥१५॥ इतिहस्मसकलवेदलोकदेवब्राह्मणगवांपरम
गुरोर्भगवतऋषभाख्यस्यविशुद्धाचरितेरितंपुंसांसमस्तदुरिताभिहरणंप
रममहामंगलायनमिदमनुश्रद्धयोपचितयानुशृणोत्याश्रावयतिवाऽव
हितोभगवतितस्मिन्वासुदेवएकांततोभक्तिरनयोरपिसमनुवर्त्तते ॥१६॥ य
स्यामेवकुवयआत्मानमविरतंविविधवृजिनसंसारपरितापोपतप्यमान
मनुसवनंस्नापयंतस्तयैवपरयानिर्वृत्याह्यपवर्गमात्यंतिकंपरमपुरुषार्थ
मपिस्वयमासादितंनोएवाद्रियंते ॥ भगवदीयत्वेनैँपरिसमाप्तसर्वार्थाः ॥१७ व
राजन्पतिर्गुरुरलंभवतांयदूनांदैवंप्रियःकुलपतिःक्वचकिंकरोवः ॥ अस्त्वेव

मंगभगवानूभजतांमुकुंदोमुक्तिंददातिकर्हिचित्स्मनभक्तियोगं॥१८॥नित्या
नुभूतनिजलाभनिवृत्ततृस्नःश्रेयस्यतद्रचनयाचिरसुप्तबुद्धेः॥लोकस्ययःक
रुणयाभयमात्मलोकमाख्यान्नमोभगवतेऋषभायतस्मै॥१९॥इतिश्रीभा
गवतेमहापुराणेपंचमस्कंधेऋषभदेवानुचरितेषष्ठो ऽध्यायः॥६॥अध्यायानां
त्रयेणैवमृषभाख्यानमीरितं॥अष्टभिर्भरताख्यानंमतःप्रस्तूयतेमृत
॥१॥सप्तमेभरतोराज्येचिरंयज्ञैर्हरिंयजन्॥आरब्धकर्मनिर्वाणेहरिक्षेत्रेभ
जद्धरिं॥२॥शुकउवाच॥भरतस्तुमहाभागवतोयदाभगवतावनितलपरि
पालनायसंचिंतितः॥तदनुशासनपरःपंचजनींविश्वरूपदुहितामुपये ॥राम॥
मे॥१॥तस्यामुहवाआत्मजानूकार्त्स्न्येनानुरूपानात्मनःपंचजनयामासभूतादिरिवभू ॥२०॥

नसूक्ष्माणि ॥ २ ॥ सुमतिंराष्ट्रभृतंसुदर्शनमावरणंधूम्रकेतुमिति ॥ अजनाभं
नामैतद्वर्षंभारतमितियतआरभ्यव्यपदिशंति ॥ ३ ॥ सबहुविन्महीपतिःपितृपि
तामहवदुरुवत्सलतयास्वेस्वेकर्मणिवर्त्तमानाःप्रजाःस्वधर्ममनुवर्त्तमानः
पर्यपालयत् ॥ ४ ॥ ईजेचभगवंतंयज्ञक्रतुंक्रतुभिरुच्चावचैःश्रद्धयाहृताग्निहो
त्रदर्शपूर्णमासचातुर्मास्यपशुसोमानांप्रकृतिविकृतिभिरनुसवनंचातुर्हो
त्रविधिना ॥ ५ ॥ संप्रचरत्सुनानायागेषुविरचितांगक्रियेष्वपूर्वंयत्तत्क्रियाफलं
धर्माख्यंपरेब्रह्मणियज्ञपुरुषेसर्वदेवतालिंगानांमंत्राणामर्थनियामक
तयासाक्षात्कर्त्तरिपरदेवतायांभगवतिवासुदेवएवभावयमानआत्मनैपु
ण्यमृदितकषायोहविःष्वध्वर्युभिर्गृह्यमाणेषुसयजमानोयज्ञभाजोदेवांस्ता

नुपुरुषावयवेष्वभ्यध्यायत् ॥६॥ एवंकर्मविशुद्ध्याविशुद्धसत्वस्यांतर्हृदया
काशशरीरेब्रह्मणिभगवतिवासुदेवेमहापुरुषरूपोपलक्षणेश्रीवत्सकौ
स्तुभवनमालारिदरगदादिभिरुपलक्षितेनिजपुरुषहृल्लिखितेनात्मनि
पुरुषरूपेणविरोचमानउच्चैस्तरांभक्तिरनुदिनमेधमानरयाजायत ॥७॥ ए
वंवर्षायुतसहस्रपर्यंतावसितकर्मनिर्वाणावसरोधिभुज्यमानंस्वतनयेभ्यो
रिक्थंपितृपैतामहंयथादायंविभज्यस्वयंसकलसंपन्निकेतात्स्वनिकेतात्
पुलहाश्रमंप्रवव्राज ॥८॥ यत्रहवावभगवान्हरिरद्यापितत्रत्यानांनिजजना
नांवात्सल्येनसंनिधाप्यतइच्छारूपेण ॥ यत्राश्रमपदानुभयतोनाभिभिर्दृष
च्चक्रैश्चक्रनदीनामसरित्प्रवरासर्वतःपवित्रीकरोति ॥९॥ तस्मिन्वावकिल

सएकलःपुलहाश्रमोपवनेविविधकुसुमकिसलयतुलसिकांबुभिःकंदमू
लफलोपहारैश्चसमीहमानोभगवतआराधनंविविक्तउपरतविषयाभि
लाषउपभृतोपशमःपरांनिर्वृतिमवाप॥१०॥तयेत्थमविरतपुरुषपरिचर्य
याभगवतिप्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यःप्रहर्षवेगेनात्मन्यु
द्भिद्यमानरोमपुलककुलकऔत्कंठ्यप्रवृत्तप्रणायबाष्पनिरुद्धावलोकन
यनएवंनिजरमणारुणचरणारविंदानुध्यानपरिचितभक्तियोगेनपरिप्लु
तपरमाह्लादगंभीरहृदयहृदावगाढधिषणस्तामपिक्रियमाणांभगव
त्सपर्यांनसस्मार॥११॥इत्थंधृतभगवद्व्रतऐणेयाजिनवाससानुसवना
भिषेकार्द्रकपिशकुटिलजटाकलापेनचविरोचमानःसूर्य्यर्चाभगवंतंहि

रण्मयं पुरुषमुज्जिहाने सूर्यमंडलेभ्युपतिष्ठन्नेतदु होवाच ॥१२॥ परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान ॥ सुरेतसादः पुनराविश्य विचष्टे हंसं गृध्राणं नृषद्रिंगिरामिमः ॥१३॥ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भगवत्परिचर्यायां सप्तमोऽध्यायः ॥७॥ ॥ अष्टमे भजतो विष्णुं तस्य कर्मांतरायतः ॥ एणरक्षाप्रसक्तस्य जातमेणत्वमीर्यते ॥१॥ कृपयापि कृतः संगः पतनायैव योगिनः ॥ इति प्रदर्शयन्नाह भरतस्यैणपोषणं ॥२॥ शुक उवाच ॥ एकदा तु महानद्यां कृताभिषेकनैयमिकावश्यको ब्रह्माक्षरमभिगृणानो मुहूर्त्तत्रयमुदकांत उपविवेश ॥ तत्र तदा राजन् हरिणी पिपासया जलाशयाभ्याशमेकैवोपजगाम ॥ तया पेपीयमान उदके तावदेवाविदूरेण नदतो मृग

पतेरुन्नादोलोकभयंकरउदपतत्॥१॥तमुपश्रुत्यसामृगवधूःप्रकृतिवि
क्लवाचकितनिरीक्षणासुतरामपिहरिभयाभिनिवेशव्यग्रहृदयापारिप्ल
वदृष्टिरगततृषाभयात्सहसैवोच्चक्राम॥२॥तस्याउत्पतंत्याअंतर्वत्न्याउ
रुभयावगलितोयोनिनिर्गतोगर्भःस्रोतसिनिपपात॥तत्प्रसवोत्सर्पण
भयखेदातुरास्वगणेनवियुज्यमानाकस्यांचिद्दर्यांकृष्णसारसतीनिपपा
तअथचममार॥३॥तंत्वेणकुणकंकृपणंस्रोतसानूह्यमानमभिवीक्ष्याप
विद्धंबंधुरिवानुकंपयाराजर्षिर्भरतआदायमृतमातरमित्याश्रमपदमनयत्
॥४॥तस्यहवाएणकुणकेउच्चैरेतस्मिन्कृतनिजाभिमानस्याहरहस्तत्पोषण
पालनलालनप्रीणनानुध्यानेनात्मनियमाःसहयमाःपुरुषपरिचर्यादयए

॥भा॰पं॰॥
॥२३॥

केकत्राः कतिपयेनाहर्गणेन वियुज्यमानाः किल सर्व एवोदवसन्॥५॥अहो बता
यं हरिणकुणकः कृपण ईश्वररथ चरणपरिभ्रमणरयेण स्वगणसुहृद्बंधुभ्यः
परिवर्जितः शरणं च मोपसादितो मामेव मातापितरौ भ्रातृज्ञातीन्यौथिकां
श्चैवोपेयाय नान्यं कंचन वेद मय्यतिविश्रब्धश्चात एव मया मत्परायस्य पोष
णपालनप्रीणनलालनमनसूयुनानुष्ठेयं शरण्योपेक्षादोषविदुषा॥६॥नूनं ह्या
र्याः साधव उपशमनशीलाः कृपणसुहृद एवंविधार्थे स्वार्थानपि गुरुतरानुपे
क्षंते॥७॥इति कृतानुषंग आसनशयनाटनस्नानाशनादिषु सह मृगजहुना
स्नेहानुबद्धहृदय आसीत्॥८॥कुसुमकुशसमित्पलाशफलमूलोदका
न्याहरिष्यमाणो वृकशालावृकादिभ्यो भयमाशंसमानः॥यदा सह हरि

अ॰ ७
ण ४
॥राम॥
॥२३॥

णकुणकेनवनंसमाविघ्राति॥९॥पथिषुचमुग्धभावेनतत्रतत्रविषक्तमतिप्र
णयभरहृदयःकार्पण्यात्स्कंधेनोद्वहति॥एवमुत्संगेउरसिचाधायोपलाल
यन्मुदंपरमामवाप॥१०॥क्रियायांनिर्वर्त्यमानायामंतरालेष्युत्थायोत्थाय
यदैनमभिचक्षीततर्हिवावसवर्षपतिःप्रकृतिस्थेनमनसातस्माआशिषआ
शास्तेस्वस्तिस्ताद्वत्सतेसर्वतइति॥११॥अन्यदाभृशमुद्विग्नमनानष्टद्रविण
इवकृपणःसकरुणमतितर्षेणहरिणकुणकविरहविह्वलहृदयसंतापस्तमे
वानुशोचन्किलकश्मलंमहदभिरंभितइतिहोवाच॥१२॥अपिबतसवैकृ
पणएणबालकोमृतहरिणीसुतोहोममानार्य्यस्यशठकिरातमतेरकृत
सुकृतस्यकृतविश्रंभआत्मप्रत्ययेनतदविगणयन्सुजनइवागमिष्यतिकिं॥१३॥

॥भा॰ पं॰॥ अपिक्षेमेणास्मिन्नाश्रमोपवनेशष्पाणिचरंतंदेवगुरुंद्रक्ष्यामि॥१४॥अ अ॰ ७
॥२४॥ पिनष्टकःशालावृकोन्यतमोवानेकचरएकचरोवाभक्षयति॥१५॥निम्लोचति
हभगवान्सकलजगत्क्षेमोदयसख्यात्माद्यापिममनमृगवधून्यासआ
गच्छति॥१६॥अपिस्विदकृतसुकृतमागत्यमांसुखयिष्यतिहरिणराजकुमा
रोविविधरुचिरदर्शनीयनिजमृगदारकविनोदैःसंतोषंस्वानामपनुदन्॥१७॥ २
क्ष्वेलिकायांमांमृषासमाधिनाआमीलितदृशंप्रेमसंरंभेणचकितचकि
तआगत्यपृषदपरुषविषाणाग्रेणलुठति॥१८॥आसादितहविषिबर्हिषि
दूषितेमयोपालब्धोभीतभीतःसपद्युपरतरासऋषिकुमारवदवहितकर ॥एम॰॥
णकलापआस्ते॥१९॥किंवाअरेआचरितंनपस्तपस्विन्यानयायदियमव ॥२४॥

निःसविनयकृस्मसारतनयतनुतरस्कभगशिवतमाखरखुरपदपंक्तिभिर्द्र
विणविधुरातुरस्यकृपणस्यममद्रविणपदवींसूचयंत्यात्मानंचसर्वतःकृतको
तुकंद्विजानांस्वर्गापवर्गकामानांदेवयजनंकरोति॥२०॥अपिस्विदसोभगवा
नुडुपतिरेनंमृगपतिभयातूमृतमातरंमृगबालकंस्वाश्रमपरिभ्रष्टमनुकं
पयाकृपणजनवत्सलःपरिपाति॥२१॥किंवात्मजविश्लेषज्वरदवदहनशिखा
भिरुपतप्यमानहृदयस्थलनलनीकंमामुपसृतमृगीतनयंशिशिरतृंगंता
नुरागगुणितनिजवदनसलिलामृतमयगभस्तिभिःस्वधयतीतिवा॥२२॥
एवमघटमानमनोरथाकुलहृदयोमृगदारकाभासेनस्वारब्धकर्मणायोगा
रंभणतोविभ्रंशितःसयोगतापसोभगवदाराधनलक्षणाच्च॥कथमितरथा

॥भा·पं·॥
॥२५॥

जात्यंतरएणकुणकआसंगःसाक्षान्निःश्रेयसप्रतिपक्षतयाप्राक्परित्यक्त
दुस्त्यजहृदयाभिजातस्य॥ तस्यैवमंतरायविहतयोगारंभणस्यराजर्षेर्भरत
स्यतावन्मृगार्भकपोषणपालनप्रीणनलालनानुषंगेणाविगणयतआत्मा
नमहिरिवाखुबिलंदुरतिक्रमःकालःकरालरभसआपद्यत॥२६॥तदानी
मपिपार्श्ववर्त्तिनमात्मजमिवानुशोचंतमभिवीक्षमाणोमृगएवाभिनिवेशि
तमनाविसृज्यलोकमिमंसहमृगेणकलेवरंमृतमनुनमृतपूर्वजन्मानुस्मृ
तिरितरवन्मृगशरीरमवाप॥२७॥तत्रापिहवाआत्मनोमृगत्वकारणंभगवदा
राधनसमीहानुभावेनानुस्मृत्यभृशमनुतप्यमानआह॥२८॥अहोकष्टंभ्रष्टो
हमात्मवतामनुपथात्यद्विमुक्तसमस्तसंगस्यविविक्तपुण्यारण्यशरणस्या

अ·८

॥राम·॥
॥२५॥

त्मवदात्मनिसर्वेषांआत्मनांभगवतिवासुदेवेतदनुश्रवणमननसंकीर्त
नाराधनानुस्मरणाभियोगेनाशून्यसकलयामेनकालेनसमावेशितंसमा
हितंकार्त्स्न्येनमनस्तत्तुपुनर्ममाबुधस्यारान्मृगसुतमनुपरिसुस्राव॥२६॥
इत्येवंनिगूढनिर्वेदोविसृज्यमृगींमातरंपुनर्भगवत्क्षेत्रमुपशमशीलमुनि
गणदयितंशालग्रामंपुलस्त्यपुलहाश्रमंकालंजरात्प्रत्याजगाम॥२७॥त
स्मिन्नपिकालंप्रतीक्षमाणःसंगाच्चभृशमुद्विग्नआत्मसहचरःशुष्कपर्णतृ
णवीरुधाद्विवर्त्तमानोमृगत्वनिमित्तावसानमेवगणयन्मृगशरीरंतीर्थोद
कक्लिन्नमुत्ससर्ज॥२८॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभरतच
रितेअष्टमोध्यायः॥ ॥८॥नवमेजडविप्रत्वेतस्यरागाद्यभावतः॥भद्रकाली

पशुत्वेपिनिर्विकारत्वमीर्यते ॥ १ ॥ पितुःश्राधात्मविज्ञानोभरतोमृगतांगतः ॥
प्रारब्धकर्मवेगेनतदंतेजडविप्रतां ॥ २ ॥ श्रीशुकउवाच ॥ अथकस्यचिद्द्विजवर
स्यांगिरसःप्रवरस्यशमदमतपःस्वाध्यायाध्ययनत्यागसंतोषतितिक्षाप्रश्र
यविद्यानसूयात्मज्ञानानंदयुक्तस्यात्मसदृशश्रुतशीलाचाररूपौदार्यगुणा
नवसोदर्याअंगजाबभूवुःमिथुनंचयवीयस्यांभार्यायां ॥ १ ॥ यस्तुतत्रपुमांस्तं
परमभागवतंराजर्षिप्रवरंभरतमुत्सृष्टमृगशरीरंचरमशरीरेणविप्रत्वंगत
माहुः ॥ २ ॥ तत्रापिस्वजनसंगाच्चभृशमुद्विजमानोभगवतःकर्मबंधविध्वंस
नश्रवणस्मरणगुणविवरणचरणारविंदयुगलंमनसाविदधदात्मनःप्र
तिघातमाशंकमानोभगवदनुग्रहेणानुस्मृतस्वपूर्वजन्मावलिरात्मानमु

न्मत्तजडांधबधिरस्वरूपेणदर्शयामासलोकस्य॥३॥तस्यापिहवाआत्मजस्य
विप्रःपुत्रस्नेहानुबद्धमनाआसमा~~न~~वर्त्तनात्संस्कारान्यथोपदेशंविदधानउ
पनीतस्यचपुनःशौचाचमनादीन्कर्मनियमाननभिप्रेतानपिसमशिक्षयत्
अनुशिष्टेनहिभाव्यंपितुःपुत्रेणेति॥४॥सचापितदुहपितृसंनिधावेवासध्रीची
नमिवस्मकरोति॥५॥छंदांस्यध्यापयिष्यन्सहव्याहृतिभिःसप्रणवशिरस्त्रिपदीं
सावित्रींग्रैष्मवासंतिकांमासानधीयानमप्यसमवेतरूपंग्राहयामास॥६॥ए
वंस्वतनुजआत्मन्यनुरागावेशितचित्तःशौचाचमनाध्ययनव्रतनियमगुर्व
नलशुश्रूषणाद्यौपकुर्वाणकस्यकर्माण्यनभियुक्तान्यपिसमनुशिष्टेनभाव्य
मित्यसदाग्रहःपुत्रमनुशास्यस्वयंतावदनधिगतमनोरथःकालेनाप्रमत्तेनस्वयं

ग्रहएवप्रमत्तउपसंहृतः॥ ७ ॥अथयवीयसीद्विजसतीस्वगर्भजातंमिथुनं
सपत्न्याउपन्यस्यस्वयमनुसंस्थयापतिलोकमगात्॥ ८ ॥पितर्य्युपरतेभ्रा
तरएनमतत्प्रभावविदस्त्रय्यांविद्यायामेवपर्यवसितमतयोनपरविद्या
यांजडमतिरितिभ्रातुरनुशासननिर्बंधान्न्यवृत्सन्॥ ९ ॥सचप्राकृतैर्द्विप
दपशुभिरुन्मत्तजडबधिरेत्यभिभाष्यमाणोयदातदनुरूपाणिप्रभाषते
कर्म्माणिचसकार्यमाणःपरेच्छयाकरोतिविष्टितोवेतनतोवायाच्ञयायदृच्छ
यावोपसादितमल्पंबहुमिष्टंकदन्नंवाभ्यवहरतिपरंनेंद्रियप्रीतिनिमित्तं॥
नित्यनिवृत्तनिमित्तस्वसिद्धविशुद्धानुभवानंदस्वात्मलाभाधिगमःसुखदुः
खयोर्द्वंद्वनिमित्तयोरसंभावितदेहाभिमानः॥१०॥शीतोष्णवातवर्षेषुवृष

दूवानाद्वृतांगः पीनः संहननांगः स्थंडिलसंवेशनानुन्मर्दनामज्जनरजसा
महामणिरिवानभिव्यक्तब्रह्मवर्चसः कुपटावृतकटिरुपवीतेनोरुमषिणा
द्विजातिरिति ब्रह्मबंधुरिति संज्ञयाऽतज्ज्ञजनावमतो विचचार ॥११॥ यदा तु
परत आहारं कर्मवेतनत ईहमानः ॥ स्वभ्रातृभिरपि केदारकर्मणि निरूपि
तस्तदपि करोति किंतु न समविषमन्यूनमधिकमिति वेद कणपिण्याकफ
लीकरणकुल्माषस्थालीपुरीषादीन्यप्यमृतवदभ्यवहरति ॥१२॥ अथ
कदाचित्कश्चिद्वृषलपतिर्भद्रकाल्यै पुरुषपशुमालभतापत्यकामः ॥१३॥
तस्य ह दैवमुक्तस्य पशोः पदवीं तदनुचराः परिधावंतो निशि निशीथसमये
तमसावृतायामनधिगतपशवः आकस्मिकेन विधिना केदारान्वीरासनेन

॥भा॰पं॰॥
॥२८॥

मृगवराहादिभ्यःसंरक्ष्यमाणमंगिरःप्रवरसुतमपश्यन्॥१४॥अथतएन
मनवद्यलक्षणमवमृश्यभर्तृकर्मनिष्पत्तिंमन्यमानाबध्वारशनयाचंडि
कागृहमुपनिन्युर्मुदाविकशितवदनाः॥१५॥अथपणयस्तंस्वविधिनाभि
षिच्याहतवाससाच्छाद्यभूषणालेपस्रक्तिलकादिभिःउपस्कृतंभुक्तवंतं
धूपदीपमाल्यलाजकिशलयांकुरफलोपहारोपेतयावैशससंस्थयाम
हतागीतस्तुतिमृदंगवेणुपणवघोषेणचपुरुषपशुंभद्रकाल्याःपुरतउ
पवेशयामासुः॥१६॥अथवृषलराजपणिःपुरुषपशोरसृगासवेनदेवीं
भद्रकालींयक्षमाणस्तदभिमंत्रितमसिमतिकरालंनिशितमुपाददे॥१७
इतितेषांवृषलानांरजस्तमःप्रकृतीनांधनमदरजउत्सिक्तमनसांभगव

अ॰९

कू

॥राम॰॥
॥२८॥

त्कलावीरकुलंकदर्थीकृत्योत्सथेनस्वैरंविहरतांहिंसाविहाराणांकर्माति
दारुणंयद्ब्रह्मभूतस्यसाक्षाद्ब्रह्मर्षिसुतस्यनिर्वैरस्यसर्वभूतसुहृदःस्वना
यामप्यननुमतमालंभनंतदुपलभ्यब्रह्मतेजसातिदुर्विषहेणदंदह्यमा
नेनवपुषासहसोच्चचाटसैवदेवीभद्रकाली॥१८॥भृशममर्षरोषावेश
रभसविलसितभृकुटीविटपकुटिलदंष्ट्रारुणेक्षणाटोपातिभयानकवद
नाहंतुकामेवेदंमहाट्टहासमतिसंरंभेणविमुंचतीततउत्पत्यपापीयसां
दुष्टानांतेनैवासिनाविकृत्तकण्ठशीर्ष्णांगलात्स्रवंतमसृगासवमत्युष्णंसह
गणेननिपीयातिपानमदविह्वलोच्चैस्तरांस्वपार्षदैःसहजगौननर्त्तचवि
जहारचशिरःकंदुकलीलया॥१९॥एवमेवखलुमहदभिचारातिक्रमःका

त्वन्येनात्मनेफलति॥२०॥नवाएतद्विष्णुदत्तमहदद्भुतंयदसंभ्रमःस्वशिरः
छेदनआपतितेपिविमुक्तदेहाद्यात्मभावसुदृढहृदयग्रंथीनांसर्वस
त्वसुहृदात्मनांनिर्वैराणांसाक्षाद्भगवतानिमिषारिवरायुधेनाप्रमत्तेन
तैस्तैर्भावैःपरिरक्ष्यमाणानांतत्पादमूलमकुतश्चिद्भयमुपसृतानांभा
गवतपरमहंसानां॥२१॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेजडभ
रथचरितेनामनवमोऽध्यायः॥ ॥९॥ ॥दशमेक्षिपताराज्ञाशिबिकां
स्वांवहन्मुनिः॥स्वदुर्वादानुवादेनविज्ञायाशुप्रसादितः॥१॥एवंभूताविका
रित्वमज्ञसर्वज्ञयोःसमं॥इतिसर्वज्ञतासिद्ध्यैरहूगणकथेरणं॥२॥सुकउवा
च॥अथसिंधुसौवीरपतेरहूगणस्यव्रजतइक्षुमत्यास्तटेतत्कुलपति

नाशिबिकावाहपुरुषान्वेषणसमयेदैवेनोपसादितः॥सद्विजवरउपल
ब्धएषपीवायुवासंहननांगोगोखरवद्धुरंबोढुमलमितिपूर्वविष्टिगृहीतैः
सहगृहीतःप्रसभमतदर्हउवाहशिबिकांस महानुभावः॥१॥यदाहिद्विज
वरस्येषुमात्रावलोकानुगतेर्नसमाहितापुरुषगतिस्तदाविषमगतांस्वशि
बिकांरहूगणउपधार्यपुरुषानधिवहतआहहेवोढारःसाध्वतिक्रमतकि
मितिविषममुह्यतेयानमिति॥२॥अथतईश्वरवचःसोपालंभमुपाकर्ण्यो
पायतुरीयाच्छंकितमनसस्तंविज्ञापयांबभूवुः॥३॥नवयंनरदेवप्रमत्ता
भवन्नियमानुपथाःसाध्वेववहामःअयमधुनैवनियुक्तोपिनद्रुतंव्रजति
नानेनसहवोढुमुहवयंपारयामइति॥४॥सांसर्गिकोदोषएवनूनमेकस्या

पिसर्वेषांसंसर्गिणांभवितुमर्हतीतिनिश्चित्यनिरूप्यकृपणवचोराजारहूगण
नि२ उपासितवृद्धोपिंसर्गेणबलात्कृतईषदुत्थितमन्युरविस्पष्टब्रह्मतेजसंजात
वेदसमिवरजसावृतमतिराह ॥५॥ अहोकष्टंभ्रातर्व्यक्तमुरुपरिश्रांतोदीर्घ
मध्वानमेकएवऊहिवान्सुचिरंनातिपीवानसंहननांगोजरसाचोपद्रुतोभ
वान्सखेनोएवापरएतेसंघट्टिनइतिबहुविप्रलब्धोप्यविद्ययाविहितद्रव्यगुण
कर्माशयस्वचरमकलेवरेअवस्तुनिसंस्थानविशेषेऽहंममेत्यनध्यारोपितमि
थ्याप्रत्ययोब्रह्मभूतस्तूष्णींशिबिकांपूर्ववदुवाह ॥६॥ अथपुनःस्वशिबिकायां
विषमगतायांप्रकुपितउवाचरहूगणः ॥७॥ किमिदमरेत्वंजीवन्मृतोमांकद
र्थीकृत्यभर्तृशासनमतिचरसिप्रमत्तस्यचतेकरोमिचिकित्सांदंडपाणिरि

वजनतायायथाप्रकृतिंस्वांभजिष्यसइति ॥८॥ एवंबह्वबद्धमपिभाषमाणं
नरदेवाभिमानंरजसातमसानुविद्धेनमदेनतिरस्कृताशेषभगवत्प्रियनिके
तंपंडितमानिनंसभगवान्ब्राह्मणोब्रह्मभूतःसर्वभूतसुहृदात्मायोगेश्वर
चर्यायामतिव्युत्पन्नमतिःस्मयमानइवविगतस्मयइदमाह ॥९॥ ब्राह्मणउवा
च ॥ त्वयोदितंव्यक्तमविप्रलब्धंभर्तुःसमेस्याद्यदिवीरभारः ॥ गंतुर्यदिस्याद
धिगम्यमध्वापीवेतिराशौनविदांप्रवादः ॥१०॥ स्थौल्यंकार्श्यंव्याधयआधय
श्चक्षुत्तृड्भयंकलिरिच्छाजराच ॥ निद्रारतिर्मन्युरहंमदःशुचोदेहेनजातस्य
हिमेनसंति ॥११॥ जीवन्मृतत्वंनियमेनराजन्नाद्यंतवद्यद्विकृतस्यदृष्टं ॥ स्व
स्वाम्यभावोध्रुवईड्ययत्रतर्ह्युच्यतेसौविधिकृत्ययोगः ॥१२॥ विशेषबुद्धे

र्विवरंमनाक्चपरस्यामयल्लब्धव्यवहारतोऽन्यत्॥कईश्वरस्तत्रकिमीशितव्यं
तथापिराजन्करवामकिंते॥१३॥उन्मत्तमत्तजडवत्स्वसंस्थांगतस्यमेवी
रचिकित्सितेन॥अर्थःकियान्भवताशिक्षितेनस्तब्धप्रमत्तस्यचपिष्टपे
षः॥१४॥श्रीशुकउवाच॥एतावदनुवादपरिभाषयाप्रत्युदीर्यमुनिवरउप
शमशीलउपरतानात्म्यनिमित्तउपभोगेनकर्मारब्धंव्यपनयन्राजयान
मपितथोवाह॥१५॥सचापिपांडवेयसिंधुसौवीरपतिस्तत्वजिज्ञासायांसम्य
क्श्रद्धयाधिकृताधिकारस्तद्धृदयग्रंथिविमोचनंद्विजवचआश्रुत्यबहु
योगग्रंथसम्मतंत्वरयावरुह्यशिरसापादमूलमुपसृतःक्षमापयन्विगत
नृपदेवस्मयउवाच॥१६॥कस्त्वंविगूढश्चरसिद्विजानांविभर्षिसूत्रंकतमो

वृ

वधूतः॥कस्यासिकुत्रत्यइहापिकस्मात्क्षेमायनश्चेदसिनोतशुल्कः॥१७॥नाहंवि
शंकेसुरराजवज्रान्नत्र्यक्षशूलान्नयमस्यदंडात्॥नाग्न्यर्कसोमानिलवित्तपा
स्त्राच्छंकेभृशंब्रह्मकुलावमानात्॥१८॥तद्ब्रूह्यसंगोजडवन्निगूढविज्ञानवीर्यो
विचरस्यपारः॥वचांसियोगग्रथितानिसाधोनर्नःक्षमंतेमनसापिभेत्तुं॥१९॥
अहंचयोगेश्वरमात्मतत्वविदांमुनीनांपरमंगुरुंवै॥प्रष्टुंप्रवृत्तःकिमिहारणं
तत्साक्षाद्धरिंज्ञानकलावतीर्णं॥२०॥सवैभवाल्लोकनिरीक्षणार्थमव्यक्त
लिंगोविचरत्यपिस्वित्॥योगेश्वराणांगतिमंधबुद्धिःकथंविचक्षीतगृहानुबं
धः॥२१॥दृष्टःश्रमःकर्म्मतआत्मनोवैभर्त्तुर्गंतुर्भवतश्चानुमन्ये॥यथासतोदा
नयनाद्यभावात्समूलइष्टोव्यवहारमार्गः॥२२॥स्थाल्यग्नितापात्पयसोभि

तापस्तत्तापतस्तंदुलगर्भरंधिः॥देहेंद्रियास्वाशयसंनिकर्षात्तत्संसृतिःपुरुष
स्यानुरोधात्॥२३॥शास्ताभिगोप्तानृपतिप्रजानांयःकिंकरोवैनपिनष्टिपिष्टं॥
स्वधर्ममाराधनमच्युतस्ययदीहमानोविजहात्यघौघं॥२४॥तन्मेभवान्नर
देवाभिमानमदेनतुच्छीकृतसत्तमस्य॥कृषीष्टमैत्रीदृशमार्त्तबंधोयथातरे
सदवध्यानमंहः॥२५॥नविक्रियाविश्वसुहृत्सखस्यसाम्येनवीताभिमतेस्तवा
पि॥महद्विमानात्स्वकृताद्धिमादृङ्नंक्षत्यदूरादपिशूलपाणिः॥२६॥ ॥
इतिश्रीभागवतेमहापुराणेपंचमस्कंधेजडभरतचरितेदशमोऽध्यायः॥१०॥
एकादशेथसंदृष्टेरहूगणमहीभृता॥उपादिशत्परंज्ञानंसयोगीतिनिगद्य
ते॥१॥ब्राह्मणउवाच॥ अकोविदःकोविदवादवादान्वदस्यथोनातिविदांवरि

ष्टः॥ नसूरयोहिव्यवहारमेतंतत्वावमर्षेणसहामनंति॥१॥तथैवराजन्नु
रुगार्हमेधवितानविद्योरुविजृंभितेषु॥ नवेदवादेषुहितत्ववादःप्रायेणशु
द्धोनुचकास्तिसाधुः॥२॥नतस्यतत्वग्रहणायसाक्षाद्वरीयसीरपिवाचःसमा
सन्॥ स्वप्नेनिरुक्त्यागृहमेधिसौख्यंनयस्यहेयानुमितंस्वयंस्यात्॥३॥यावन्म
नोरजसापूरुषस्यसत्वेनवातमसावानुरुद्धं॥ चेतोभिराकूतिभिरातनोतिनि
रंकुशंकुशलंचेतरंवा॥४॥सवासनात्माविषयोपरक्तोगुणप्रवाहोविकृतः
षोडशात्मा॥ विभ्रत्पृथङ्नामभीरूपभेदमंतर्बहिष्ट्वंचपुरैस्तनोति॥५॥दुः
खंसुखंव्यतिरिक्तंचतीव्रंकालोपपन्नंफलमाव्यनक्ति॥ आलिंग्यमायार
चितांतरात्मास्वदेहिनंसंसृतिचक्रकूटः॥६॥तावानयंव्यवहारःसदाविःक्षे

॥भा॰ पं॰॥
॥३३॥
नृ

त्रज्ञसाक्ष्योभवतिस्थूलसूक्ष्मः॥ तस्मान्मनोलिंगमदोवदंतिगुणागुणत्व
स्यपरावरस्य॥७॥गुणानुरक्तंव्यसनायजंतोःक्षेमायनैर्गुण्यमथोमनःस्या
त्॥यथाप्रदीपोघृतवर्त्तिमश्नञ्छिखाःसधूमाभजतिह्यन्यदास्वं॥८॥पदं
तथागुणकर्मानुबद्धंवृत्तीर्मनःश्रयतेन्यत्रतत्त्वं॥एकादशासन्मनसोहिवृ
त्तयःआकूतयःपंचधियोभिमानः॥९॥मात्राणिकर्माणिपुरंचतासांवदंति
हैकादशवीरभूमीः॥गंधाकृतिस्पर्शरसश्रवांसिविसर्गरत्यर्त्यभिजल्प
शिल्पाः॥१०॥एकादशंस्वीकरणंममेतिशय्यामहंद्वादशमेकआहुः॥द्र
व्यस्वभावाशयकर्मकालैरेकादशामीमनसोविकाराः॥११॥सहस्रशःशत
शःकोटिशश्चक्षेत्रज्ञतोनमिथोनस्वतःस्युः॥१२॥क्षेत्रज्ञएतामनसोविभू

अ॰ ११

॥राम॰॥
॥३३॥

तीर्जीवस्यमायारचितस्यनित्याः ।। आविर्हिताःक्वापितिरोहिताश्चशुद्धो
विचष्टेह्यविशुद्धकर्तुः ।।१३।। क्षेत्रज्ञआत्मापुरुषःपुराणःसाक्षात्स्वयंज्योति
रजःपरेशः ।। नारायणोभगवान्वासुदेवःस्वमाययात्मन्यवधीयमानः ।।१४
।। यथानिलःस्थावरजंगमानामात्मस्वरूपेणनिविष्टईशेत् ।। एवंपरोभगवा
न्वासुदेवःक्षेत्रज्ञआत्मेदमनुप्रविष्टः ।।१५।। नयावदेतांतनुभृन्नरेंद्रविधू
यमायांवयुनोदयेन ।। विमुक्तसंगोजितषट्सपत्नोवेदात्मतत्वंभ्रमती
हतावत् ।।१६।। नयावदेतन्मनआत्मलिंगंसंसारतापावपनंजनस्य ।। यच्छो
कमोहामयरागलोभवैरानुबंधंममतांविधत्ते ।।१७।। भ्रातृव्यमेनंतददभ्र
वीर्यमुपेक्षयाध्येधितमप्रमत्तः ।। गुरोर्हरेश्चरणोपासनास्त्रोजहिव्यलीकं

॥भा॰पं॰॥
॥३४॥

स्वयमात्ममोषं॥१८॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेब्राह्मण
रहूगणसंवादेएकादशोध्यायः॥ ॥११॥ द्वादशोपुनराप्रष्टःसंदेहेनमहीभृ
ता॥सयोगीसर्वसंदेहानपानुददितीर्यते॥१॥रहूगणउवाच॥नमोनमःका
रणविग्रहायस्वरूपतुछीकृतविग्रहाय॥नमोवधूतद्विजबंधुलिंगनिगूढनि
त्यानुभवायतुभ्यं॥१॥ज्वरामयार्त्तस्ययथागदंसन्निदाघदग्धस्ययथाहि
मांभः॥कुदेहमानाहिविदष्टदृष्टेर्ब्रह्मन्वचस्तेमृतमौषधंमे॥२॥तस्माद्भ
वंतंममसंशयार्थंप्रक्ष्यामिपश्चादधुनासुबोधं॥अध्यात्मयोगग्रथितंत
वोक्तमाख्याहिकौतूहलचेतसोमे॥३॥यदाहयोगेश्वरदृश्यमानंक्रियाफ
लंसद्व्यवहारमूलं॥नह्यंजसातत्वविमर्शनायभवानमुष्मिन्भ्रमतेमनो

अ॰ १२

॥राम॰॥
॥३४॥

मे॥४॥ब्राह्मणउवाच॥अयंजनोनामचलन्पृथिव्यांयःपार्थिवःपार्थिव
कस्यहेतोः॥तस्यापिचांघ्र्योरधिगुल्फजंघाजानूरुमध्योरशिरोधरांसाः
॥५॥अंसेधिदार्वीशिबिकाचयस्यांसोवीरराजेत्यपदेशआस्ते॥यस्मि
न्भवान्रूढनिजाभिमानोराजास्मिसिंधुष्वितिदुर्मदांधः॥६॥शोच्या
निमांस्त्वमधिकष्टदीनान्विष्ट्यानिगृह्णन्निरनुग्रहोसि॥जनस्यगोप्ता
स्मिविकत्थमानोनशोभसेवृद्धसभासुधृष्टः॥७॥यदाक्षितावेवचराच
रस्यविदामनिष्ठांप्रभवंचनित्यं॥तन्नामतोन्यद्व्यवहारमूलंनिरूप्यतां
सत्क्रिययानुमेयं॥८॥एवंनिरुक्तंक्षितिशब्दवृत्तमसन्निधानात्परमा
णवोये॥अविद्ययामनसाकल्पितास्तेयेषांसमूहेनकृतोविशेषः॥९॥

एवंकृशंस्थूलमणुर्बृहद्यदसच्चसज्जीवमजीवमन्यत् ॥ द्रव्यस्वभावाशय
कालकर्मनाम्नाजयावेहिकृतंद्वितीयं ॥१०॥ ज्ञानंविशुद्धंपरमार्थमेकमनंत
रंत्वबहिर्ब्रह्मसत्यं ॥ प्रत्यक्प्रशांतंभगवच्छब्दसंज्ञंयद्वासुदेवंकवयोवदंति
॥११॥ रहूगणेतत्तपसानयातिनचेज्ययानिर्वपणात्गृहाद्वा ॥ नच्छंदसानै
वजलाग्निसूर्यैर्विनामहत्पादरजोभिषेकं ॥१२॥ यत्रोत्तमश्लोकगुणानु
वादःप्रस्तूयतेग्राम्यकथाविघातः ॥ निषेव्यमानोनुदिनंमुमुक्षोर्मतिंस
तींयच्छतिवासुदेवे ॥१३॥ अहंपुराभरतोनामराजाविमुक्तदृष्टश्रुतसंग
बंधः ॥ आराधनंभगवतईहमानोमृगोभवंमृगसंगाद्धतार्थः ॥१४॥ सामां
स्मृतिर्मृगदेहेपिवीरकृष्णार्चनप्रभवानोजहाति ॥ अथोअहंजनसंगाद

॥राम॰॥
॥३५॥

संगोविशंकमानोविवृतश्चरामि ॥१५॥ तस्मान्नरोसंगसुसंगजातज्ञानासि
नेहैवविवृक्णमोहः ॥ हरिंतदीहाकथनस्मृतिभ्यांलब्धस्मृतिर्यात्यतिपा
रमध्वनः ॥१६॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेद्वादशोध्यायः ॥
॥१२॥ ॥त्रयोदशेविरक्तायहितथातत्वनिरूपणं ॥ इतिवैराग्यदार्ढ्यार्थंभ
वाटव्युपवर्ण्यते ॥१॥ ब्राह्मणउवाच ॥ दुरत्ययेध्वन्यजयानिवेशितोरजस्त
मःसत्वविभक्तकर्मदृक् ॥ सएवसार्थोर्थपरःपरिभ्रमन्भवाटवींयातिन
शर्मविंदति ॥१॥ यस्यामिमेषण्नरदेवदस्यवःसार्थंविलुंपंतिकुनायकंब
लात् ॥ गोमायवोयत्रहरंतिसार्थिकंप्रमत्तमाविश्ययथोरणंवृकाः ॥२॥ प्र
भूतवीरुत्तृणगुल्मगह्वरेकठोरदंशैर्मशकैरुपद्रुतः ॥ क्वचित्तुगंधर्वपुरंप्र

॥भा॰पं॰॥ पश्यतिक्वचित्क्वचिच्चाशुरयोल्मुकग्रहं॥३॥निवासतोयद्रविणात्मबुद्धि अ॰१३
॥३६॥ स्ततस्ततोधावतिभोअटव्यां॥क्वचिच्चवात्योत्थितपांसुधूम्रादिशोनजा
नातिरजस्वलाक्षः॥४॥अदृश्यझिल्लीस्वनकर्णशूलउलूकवाग्भिर्व्यथितांत
रात्मा॥अपुण्यवृक्षांछ्रयतेक्षुधार्दितोमरीचितोयान्यभिधावतिक्वचित्॥५॥
क्वचिद्वितोयाःसरितोभियातिपरस्परंचालषतेनिरंधः॥आसाद्यदावंक्वचिद
ग्नितप्तोनिर्विद्यतेक्वचयक्षैर्हृतासुः॥६॥शूरैर्हृतस्वःक्वचनिर्विण्णचेताःशोच
न्विमुह्यन्नुपयातिकश्मलं॥क्वचिच्चगंधर्वपुरंप्रविष्टःप्रमोदतेनिर्वृतवन्मु
हूर्तं॥७॥चलन्क्वचित्कंटकशर्करांघ्रिर्नगारुरुक्षुर्विमनाइवास्ते॥पदेपदेभ्यं ॥राम॰॥
तरवह्निनार्दितःकौटुंबिकःक्रुध्यतिवैजनाय॥८॥क्वचिन्निगीर्णोजगराहि ॥३६॥

नाजनोनावैतिकिंचिद्विपिनेपविद्धः॥ दष्टःस्मशेतेक्वचदंदशूकैरंधोंधकूपेपतितस्तमिस्रे॥९॥ कर्हिस्मचित्क्षुद्ररसान्विचिन्वंस्तन्मक्षिकाभिर्व्यथितोविमानः॥ तत्रातिकृच्छ्रंप्रतिलब्धमानोबलाद्विलुंपंत्यथतंततोन्ये॥१०॥ क्वचिच्चशीतातपवातवर्षप्रतिक्रियांकर्तुमनीशआस्ते॥ क्वचिन्मिथोविपणन्यच्चकिंचिद्विद्वेषमृच्छत्युतवित्तशाठ्यात्॥११॥ क्वचित्क्वचित्क्षीणधनस्तुतस्मिन्शय्यासनस्थानविहारहीनः॥ याचन्परादप्रतिलब्धकामः पारक्यदृष्टिर्लभतेवमानं॥१२॥ अन्योन्यवित्तव्यतिषंगवृद्धवैरानुबंधोविवहन्मिथश्च॥ अध्वन्यमुष्मिन्नुरुकृच्छ्रवित्तबाधोपसर्गैर्विहरन्विपन्नः॥१३॥ तांस्तान्विपन्नान्सहितत्रतत्रविहायजातंपरिगृह्यसार्थः॥ आवर्ततेऽद्यापि

नकश्चिदग्रेवीराध्वनःपारमुपैतियोगं॥१४॥मनस्विनोनिर्जितदिग्गजेंद्रो
ममेतिसर्वैर्भुविबद्धवैराः॥मृधेशयीरन्नतुतद्व्रजंतियन्न्यस्तदंडोगतवैरो
भियाति॥१५॥प्रसज्जतिक्वापिलताभुजाश्रयस्तदाश्रयाव्यक्तपदद्विजस्पृ
हः॥क्वचित्कदाचिद्धरिचक्रतस्त्रसन्सख्यंविधत्तेबककंकगृध्रैः॥१६॥तैर्वं
चितोहंसकुलंसमाविशन्नरोचयन्शीलमुपैतिवानरान्॥तज्जातिरा
सेनसुनिर्वृतेंद्रियःपरस्परोद्वीक्षणविस्मृतावधिः॥१७॥द्रुमेषुरंस्यन्सुत
दारवत्सलोव्यवायदीनोविवशःस्वबंधने॥क्वचित्प्रमादाद्गिरिकंदरेपत
न्वल्लींगृहीत्वागजभीतआस्थितः॥१८॥अतःकथंचित्सविमुक्तआप
दःपुनश्चसार्थंप्रविशत्यरिंदम॥अध्वन्यमुष्मिन्नजयानिवेशितोभ्रम

जनोद्यापिनवेदकश्चन॥१९॥रहूगणत्वमपिह्यध्वनोस्यसंन्यस्तदंडः
कृतभूतमैत्रः॥असज्जितात्माहरिसेवयाशितंज्ञानासिमादायतरा
तिपारं॥२०॥ राजोवाच॥अहोनृजन्माखिलजन्मशोभनंकिंजन्मभिस्त्व
परैरप्यमुष्मिन्॥नयद्धृषीकेशयशःकृतात्मनांमहात्मनांवःप्रचुरःसमा
गमः॥२१॥नह्यद्भुतंत्वच्चरणाब्जरेणुभिर्हतांहसोभक्तिरधोक्षजेमला।मौ
हूर्त्तिकाद्यस्यसमागमाश्चमेदुस्तर्कमूलोपहतोविवेकः॥२२॥नमोमह
द्भ्योस्तुनमःशिशुभ्योनमोयुवभ्योनमआवटुभ्यः॥येब्राह्मणागामवधू
तलिंगाश्चरंतितेभ्यःशिवमस्तुराज्ञां॥२३॥श्रीशुकउवाच॥इत्येवमुत्तरा
मातःसवैब्रह्मर्षिसुतःसिंधुपतयआत्मसतत्त्वंविगणयतःपरानुभावःप

॥भा॰पं॰॥ ॥३८॥

अ॰१३

रमकारुणिकतयोपदिश्यरहूगणेनसकरुणमभिवंदितचरणआपू
र्णार्णवइवनिभृतकरणोर्म्याशयोधरणिमिमांविचचार॥२४॥सौवीरप
तिरपिसुजनसमवगतपरात्मसतत्वआत्मन्यविद्याध्यारोपितांदेहात्म
मतिंविससर्ज॥एवंहिनृपभगवदाश्रिताश्रितानुभावः॥२५॥राजोवाच॥यो
हवाइहबहुविदामहाभागवतत्वयाभिहितःपारोक्ष्येणवचसाजीवलो
कभवाध्वासह्यार्यमनीषिकयाकल्पितविषयोनांजसाअव्युत्पन्नलोक
समधिगमः॥२६॥अथतदेवैतद्दुरवगमंसमवेतानुकूल्येननिर्दिश्यता
मिति॥२७॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेत्रयोदशोऽध्यायः॥१३॥
चतुर्दशोभवारण्यरूपकव्याकृतिःकृता॥प्रस्तुतेदस्युगोमायुमशकाद्यर्थक

रा

॥राम॰॥ ॥३८॥

ल्पना ॥ १ ॥ सहोवाच ॥ यएषदेहात्ममानिनांसत्वादिगुणविशेषविकल्पित
कुशलाकुशलसमवहारविनिर्मितविविधदेहावलिभिर्वियोगसंयोगाद्य
नादिसंसारानुभवस्यद्वारभूतेनषडिंद्रियवर्गेणतस्मिन्दुर्गाध्ववदसुगमे
ध्वन्यापतितईश्वरस्यभगवतोविष्णोर्वशवर्त्तिन्यामाययाजीवलोकोयंयथा
वणिक्सार्थोर्थपरः ॥ स्वदेहनिष्पादितकर्मानुभवः श्मशानवदशिवतमा
यांसंसाराटव्यांगतोनाद्यापिविफलबहुप्रतियोगेहस्तत्तापोपशमनीं ह
रिगुरुचरणारविंदमधुकरानुपदवीमवरुंधे ॥ यस्यामुहवाएतेषडिंद्रिय
नामानःकर्मणादस्यवएवते ॥ २ ॥ तद्यथापुरुषस्यधनंयत्किंचित्साक्षा
द्धर्मौपयिकंबहुकृच्छ्राधिगतंसाक्षात्परमपुरुषाराधनलक्षणोयोसौ

॥भा॰पं॰॥
॥३९॥

धर्मस्तंतुसांपरायउदाहरंति॥तद्धर्म्यंधनंदर्शनस्पर्शनश्रवणास्वादनाव
घ्राणसंकल्पव्यवसायगृहग्राम्योपभोगेनकुनाथस्याजितात्मनोयथा
सार्थस्यतथाजितात्मनोविलुंपंति॥२॥अथचयत्रकौटुंबिकादारापत्या
दयोनाम्नाकर्मणावृकशृगालाएव॥अनिच्छतोऽपिकदर्यस्य॥कुटुंबिन
उरणकवत्संरक्षमाणंमिषतोपिहरंति॥३॥यथाह्यनुवत्सरंकृष्यमाण
मप्यदग्धबीजंक्षेत्रंपुनरेवावपनकालेगुल्मतृणवीरुद्भिर्गह्वरमिवभ
वति॥एवमेवगृहाश्रमःकर्मक्षेत्रंयस्मिन्नहिकर्म्माण्युत्सीदंतियदयं
कामकरंडएषआवसथः॥४॥तत्रगतोदंशमशकसमापसदैर्मनुजैः
शलभशकुंततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणःक्वचित्परि

सं

अ॰१४

॥राम॰॥
॥३९॥

वर्त्तमानोस्मिन्नध्वन्य अविद्याकामकर्मभिः उपरक्तमनसानुपपन्नार्थं न
रलोकं गंधर्वनगरमुपपन्नमितिमिथ्यादृष्टिरनुपश्यति ॥५॥ क्वचिदात
पोदकनिभान्विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः
॥६॥ क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्म्मितमतिः सु
वर्णमुपादित्सत्यग्निकामकातर इवोल्मुकपिशाचं ॥७॥ अथ कदाचि
न्निवासपानीयद्रविणाद्यनेकात्मोपजीवनाभिनिवेश एतस्यां संसा
राटव्यामितस्ततः परिधावति ॥८॥ क्वचिच्च वात्योपम्यया प्रमदयारोह
मारोपितस्तत्कालरजसा रजनीभूत इवासाधुमर्यादो रजस्वलाक्षोपि दि
ग्देवता अतिरजस्वलमतिर्न विजानाति ॥१०॥ क्वचित्सकृदवगतविषय

वैतथ्यःस्वयंपराभिध्यानेनविभ्रंशितस्मृतिस्तयैवमरीचितोयप्रायांस्ता
नेवाभिधावति॥११॥क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपंप्रत्य
क्षंपरोक्षंवारिपुराजकुलनिर्भर्त्सितेनातिव्यथितकर्णमूलहृदयः॥१२॥सय
दादुग्धपूर्वसुकृतस्तदाकारस्करकाकतुंडाद्यपुण्यद्रुममलताविषोदपानव
दुभयार्थशून्यद्रविणानूजीवन्मृतास्वयंजीवन्म्रियमाणउपधावति॥१३
एकदासत्प्रसंगान्निकृतमतिर्व्युदकस्रोतस्स्खलनवदुभयतोपिदुःखदं
पाखंडमभियाति॥१४॥यदातुपरबाधयांधआत्मनेनोपनमतितदाहिपि
तृपुत्रबर्हिष्मतःपितृपुत्रान्वासखलुभक्षयति॥१५॥क्वचिदासाद्यगृहंदाव
वत्प्रियार्थविधुरंअसुखोदर्कंशोकाग्निनादह्यमानोभृशंनिर्वेदमुपगच्छ

त

व

ति ॥१६॥ क्वचित्कालविषमितराजकुलरक्षसाऽपहृतप्रियतमधनासुःप्रमृ
तकइवविगतजीवलक्षण आस्ते ॥१७॥ कदाचिन्मनोरथोपगतपितृपिता
महाद्यसत्सदितिस्वप्ननिर्वृत्तिलक्षणमनुभवति ॥१८॥ क्वचिद्गृहाश्रमकर्म
चोदनातिभरगिरिमारुरुक्षमाणो लोकव्यसनकर्शितमनाः कंटकशर्करा
क्षेत्रंप्रविशन्निवसीदति ॥१९॥ क्वचिच्च दुःसहेनकायाभ्यंतरवह्निनागृहीत
सारःस्वकुटुंबायक्रुध्यति ॥२०॥ सएवपुनर्निद्राजगरगृहीतोंधेतमसिम
ग्नःशून्यारण्यइवशेतेनान्यत्किंचनवेदशवइवापविद्धः ॥२१॥ कदाचि
द्भग्नमानदंष्ट्रोदुर्ज्जनदंदशूकैरलब्धनिद्राक्षणोव्यथितहृदयेनानुक्षी
यमाणविज्ञानोंधकूपेंधवत्पतति ॥२२॥ कर्हिस्माचित्काममधुलवान्विचि

त्वन्यदापरदारपरद्रव्याण्यवरुंधानोराज्ञास्वामिभिर्वानिहतःपतत्यपा
रेनिरये॥२३॥अथचतस्मादुभयथापिहिकर्मास्मिन्नात्मनःसंसारा
वपनमुदाहरंति॥२४॥मुक्तस्ततोयदिबंधाद्देवदत्तउपाच्छिनत्तितस्माद
पिविष्णुमित्रइत्यनवस्थितिः॥२५॥क्वचिच्चशीतवाताद्यनेकाधिदैविकभौ
तिकात्मीयानांदशानांप्रतिनिवारणअकल्पोदुरंतचिंतयाविषण्णआ
स्ते॥२६॥क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमन्येभ्योवाकाकिणिकामात्रम कि
पहरन्यत्किंचिद्वाविद्वेषमेतिवित्तशाठ्यात्॥२७॥अध्वन्यमुष्मिन्निमउ
पसर्गास्तथासुखदुःखरागद्वेषभयाभिमानप्रमादोन्मादशोकमोह
लोभमात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्मजरामरणादयः॥२८

क्कापिदेवमाययास्त्रियाभुजलतोपगूढःप्रस्कन्नविवेकविज्ञानोयद्विहार
गृहारंभाकुलहृदयस्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोक
विचेष्टितापहृतहृदयआत्मानमजितात्मापारेंधेतमसिप्रहिणोति॥२९॥क
दाचिदीश्वरस्यभगवतोविष्णोश्चक्रात्परमाण्वादिद्विपरार्द्धापवर्गात्का
लोपलक्षणात्परिवर्त्ततेनवयसारंहसाहरतआब्रह्मतृणस्तंबादीनांभू
तानामनिमिषतोमिषतांवित्रस्तहृदयस्तमेवेश्वरंकालचक्रनिजायुधंसा
क्षाद्भगवंतंयज्ञपुरुषमनादृत्यपाषंडदेवताःकंकगृध्रबकवटप्रायाआर्य
समयपरिहृताःसांकेत्येनाभिधत्ते॥३०॥यदातुपाषंडिभिरात्मवंचितैस्तै
रुरुवंचितोब्रह्मकुलंसमावसंस्तेषांशीलमुपनयनादिश्रौतस्मार्त्तकर्मा

॥भा॰पं॰॥
॥४२॥

अ॰१४

नुष्ठानेनभगवतोयज्ञपुरुषस्यआराधनमेवतदरोचयंछूद्रकुलंभज
ते॥निगमाचारेशुद्धितोयस्यमिथुनीभावःकुटुंबभरणंयथावानरजा
तेः॥३१॥तत्रापिनिरवरोधःस्वैरेणविहरन्नतिकृपणबुद्धिरन्योन्यमुख
निरीक्षणादिनाग्राम्यकर्मणैवविस्मृतकालावधिः॥३२॥क्वचिद्द्रुमवदै
हिकार्थेषुगृहेषुरंस्यन्यथावानरःसुतदारवत्सलोव्यवायक्षणः॥३३॥
एवमध्वन्यवरुंधानोमृत्युगजभयात्तमसिगिरिकंदरप्राये॥३४॥क्वचिच्छी
तवाताद्यनेकदैविकभौतिकात्मीयानांदुःखानांप्रतिनिवारणेअकल्पो
दुरंतविषयविषण्णआस्ते॥३५॥क्वचिन्मिथोव्यवहरन्यत्किंचिद्धनमुप
यातिवित्तशाठ्येन॥३६॥क्वचित्क्षीणधनःशय्यासनाद्युपभोगविहीनो

॥एम॰॥
॥४२॥

यावदप्रतिलब्धमनोरथोपगतादानेवसितमतिंस्ततोऽवमानादीनि
गनादभिलभते॥३७॥एवंवित्तव्यतिषंगविरुद्धवैरानुबंधोपिपूर्ववासन
यामिथुउद्वहत्ययापवहति॥३८॥एतस्मिन्संसाराध्वनिनानाक्लेशो
पसर्गाबाधितः॥आपन्नविपन्नोयस्तमुहवावेतरस्तत्रविसृज्यजातं
जातमुपादायशोचन्मुह्यन्बिभ्यत्॥विवदन्क्रंदन्संहृष्यन्गायन्नृह्य
मानःसाधुवर्जितोनेवावर्त्ततेऽद्यापियतआरब्धएषनरलोकसार्थःय
मध्वनःपारमुपदिशंति॥३९॥यदिदंयोगानुशासनंनवाएतदवरुंधते॥
यन्न्यस्तदंडामुनयउपशमशीलाउपरतात्मानःसमवगच्छंति॥४०॥य
दपिदिगिभजयिनोयज्विनोयेवैराजर्षयःकिंतुपरंमृधेशयीरन्॥अ

स्यामेवममेयमितिकृतवैरानुबंधाःयांविसृज्यस्वयमुपसंहृताः॥ कर्म
वल्लीमवलंब्यततआपदःकथंचिन्नरकाद्विमुक्तःपुनरप्येवंसंसारा
ध्वनिवर्त्तमानोनरलोकसार्थमुपयाति॥ एवमुपरिगतोपि॥४१॥ तस्येद
मुपगायंति॥ आर्षभस्येहराजर्षेर्मनसापिमहात्मनः॥ नानुवर्त्मार्ह
तिनृपोमक्षिकेवगरुत्मतः॥४२॥ योदुस्त्यजान्दारसुतान्सुहृद्राज्यंहृदि
स्पृशः॥ जहौयुवैवमलवदुत्तमश्लोकलालसः॥४३॥ योदुस्त्यजान्क्षि
तिसुतस्वजनार्थदारान्प्रार्थ्यांश्रियंसुरवरैःसदयावलोकां नैच्छन्नृ
पस्तदुचितंमहतांमधुद्विट्सेवानुरक्तमनसामभवोपिफल्गुः॥४४॥
यज्ञायधर्मपतयेविधिनैपुणाययोगायसांख्यशिरसेप्रकृतीश्वराय

नारायणायहरयेनमइत्युदारंहास्यन्मृगत्वमपियःसमुदाजहार॥
४५॥इदंभागवतसभाजितावदातगुणकर्मणोराजर्षेर्भरतस्यानुच
रितंस्वस्त्ययनमायुष्यंधन्यंयशस्यंस्वर्गापवर्ग्यंवानुशृणोत्याख्यास्य
त्यभिनंदतिचसर्वाएवाशिषआत्मनः॥आशास्तेनकांचनपरतइति
॥४६॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभरतोपाख्यानेब्राह्म
णरहूगणसंवादेचतुर्दशोध्यायः॥ १४॥एवमष्टभिरध्यायैर्भरतस्य
क्रमीक्षितं॥ततःपंचदशोतस्यकीर्त्यतेवंशजानृपाः॥१॥शुकउवाच॥
भरतस्यात्मजःसुमतिर्नामाभिहितोयमुहवावकेचित्पाषंडिनऋष
भपदवीमनुवर्त्तमानंचानार्याअवेदसमाम्नातांदेवतांस्वमनीषया

पापीयस्या कलौ कल्पयिष्यंति ॥१॥ तस्माद्वृद्धसेनायां देवताजिन्नाम पुत्रो
ऽभवत् ॥२॥ अथाऽसुर्यां तत्तनयो देवद्युम्नस्ततो धेनुमत्यां सुतः परमेष्ठी तस्य
सुवर्चलायां प्रतीह उपजातः ॥३॥ य आत्मविद्यामाख्याय स्वयं संशुद्धो महा
पुरुषमनुसस्मार ॥ प्रतीहात्सुवर्चलायां प्रतिहर्त्रादयस्त्रय आसन्निज्याको
विदाः सूनवः प्रतिहर्तुः स्तुत्यामजभूमानावजनिषातां ॥४॥ भूम्न ऋषिकुल्या
यामुद्गीथः ततः प्रस्तावो देवकुल्यायां प्रस्तावान्नियुत्सायां हृदयज आसी
द्विभुः विभो रत्यां च पृथुषेणः तस्मान्नक्त आकूत्यां जज्ञे नक्ताद्द्रुतिपुत्रो ग
यो राजर्षिप्रवर उदारश्रवा अजायत साक्षाद्भगवतो विष्णोर्जगद्रिरक्षिष
या गृहीतसत्वस्य कलात्मवत्वादिलक्षणेन महापुरुषतां प्राप्तः ॥५॥

सवैस्वधर्मेणप्रजापालनपोषणप्रीणनोपलालनानुशासनलक्षणेने
ज्यादिनाचभगवतिमहापुरुषेपरावरेब्रह्मणिसर्वात्मनार्पितपरमार्थ
लक्षणेनब्रह्मविच्चरणानुसेवयापादितभगवद्भक्तियोगेनचाभीक्ष्णशः
परिभावितातिशुद्धमतिरुपरतानात्म्यआत्मनिस्वयमुपलभ्यमानब्रह्मा
त्मानुभवोपिनिरभिमानएवावनिमजूगुपत्॥ तस्येमांगाथांपांडवेयपु
राविदउपगायंति॥६॥ गयंनृपःकःप्रतियातिकर्मभिर्यज्वाभिमानीब
हुविद्धर्मगोप्ता॥ समागतश्रीःसदसस्पतिःसतांसत्सेवकोन्योभगव
त्कलामृते॥७॥ यमभ्यषिंचन्परयामुदासतीःसत्याशिषोदक्षकन्याः
सरिद्भिः॥ यस्यप्रजानांदुदुहेधराशिषोनिराशिषोगुणवत्सस्नुतोधाः॥८॥

छंदांस्यकामस्य च यस्य कामान्दुदूहुराजह्रुरथो बलिंनृपाः॥ प्रत्यंचि
ता युधि धर्मेण विप्रा यदाशिषां षष्ठमंशं परेत्य॥ ९॥ यस्याध्वरे भगवानध्व
रात्मा मघोनि माद्यत्युरुसोमपीथे॥ श्रद्धाविशुद्धाचलभक्तियोगसमर्पितेज्या
फलमाजहार॥ १०॥ यत्प्रीणनाद्बर्हिषि देवतिर्यङ्मनुष्यवीरुत्तृणमाविरिंच्या
त्॥ प्रीयेत सद्यः स ह विश्वजीवः प्रीतः स्वयंप्रीतिमगाद्गयस्य॥ ११॥ गयाद्गयं
त्यां चित्ररथः सुगतिरवरोधनइति त्रयः पुत्रा बभूवुः॥ चित्ररथादूर्णायां सम्रा
डजनिष्ट॥ १२॥ तत उत्कलायां मरीचिः मरीचेर्बिंदुमत्यां बिंदुमानुदपद्यत॥
तस्मात्सरघायां मधुर्नामाभवत्तमधोः सुमनसि वीरव्रतः ततो भोजायां मं
थुप्रमंथू जज्ञाते॥ मंथोः सत्यायां भौवनः ततो दूषणायां त्वष्टाऽजनिष्ट त्वष्टुर्वि

रोचनायांविरजःविरजस्यशतजित्प्रवरंपुत्रशतंकन्याचविषूच्यांकिलजा
तं॥१३॥तत्रायंश्लोकः॥प्रैयव्रतंवंशमिमंविरजश्चरमोद्भवः॥अकरोदत्य
लंकीर्त्याविष्णुःसुरगणंयथा॥१४॥ ॥इतिश्रीभागवतेमहापुराणेपंचमस्कं
धेपंचदशोऽध्यायः॥ ॥१५॥ ॥पूर्वोक्तद्वीपसिंध्वादिमानंचिह्नस्वरूपतः॥
स्पष्टंप्रवक्तुमारब्धापंचाध्यायीततःपरं॥१॥षोडशेऽधस्तथाचोर्ध्वंपरितःसं
निवेशतः॥मेरोःस्थितिर्महीकंजकर्णिकाचापवर्ण्यते॥२॥प्रियव्रतचरित्रो
क्ताद्वीपादिकल्पना॥तद्विशेषविजिज्ञासुःकथांतेपरिपृच्छति॥३॥राजो
वाच॥उक्तस्त्वयाभूमंडलायामविशेषोयावदादित्यस्तपतियत्रचासौज्योतिषां
गणैश्चंद्रमावासहदृश्यते॥१॥तत्रापिप्रियव्रतरथचरणपरिखातैःसप्तभिःस

प्तसिंधवउपक्लृप्ताः ॥ यतएतस्याःसप्तद्वीपविशेषविकल्पस्त्वयाभगवन्ख
लुसूचितः ॥ एतदेवाखिलमहंमानतोलक्षणतश्चसर्वंविजिज्ञास्यामि ॥२॥ भ
गवतोगुणमयेस्थूलरूपआवेशितंमनोह्यगुणेपिसूक्ष्मतमआत्मज्योतिषि
परेब्रह्मणिभगवतिवासुदेवाख्येक्षममावेशितुंतदुहेतद्गुरोर्हस्यनुवर्णयितु
मिति ॥३॥ ऋषिरुवाच ॥ नवैमहाराजभगवतोमायागुणविभूतेःस्थानविशेषा
णांनामरूपतःकाष्ठांमनसावचसावाधिगंतुमलंविबुधायुषापिपुरुषस्त
स्मात्प्राधान्येनैवभूगोलकविशेषंनामरूपमानलक्षणतोव्याख्यास्यामः
॥४॥ योवायंद्वीपःकुवलयकमलकोशाभ्यंतरकोशोनियुतयोजनविशालः
समवर्तुलोयथापुष्करपत्रं ॥५॥ यस्मिन्नववर्षाणिनवयोजनसहस्रायामा

न्यषड्भिर्मर्यादागिरिभिः सुविभक्तानि भवंति ॥६॥ एषां मध्ये इलावृतं नामाभ्यंतरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुर्द्वीपायामसमुन्नाहः कर्णिकाभूतः कुवलयकमलस्य ॥७॥ मूर्द्धनि द्वात्रिंशत्सहस्रयोजनविततो मूले षोडशसाहस्रं तावतांतर्भूम्यां प्रविष्टः उत्तरोत्तरेणेलावृतं नीलः श्वेतः शृंगवानिति त्रयो रम्यकहिरण्मयकुरूणां वर्षाणां मर्यादागिरयः प्रागायता उभयतः क्षारोदावधयो द्विसहस्रपृथव एकैकशः पूर्वस्मात्पूर्वस्मादुत्तरोत्तरो दशांशाधिकांशेन दैर्घ्य एव ह्रसंति ॥८॥ एवं दक्षिणेनेलावृतं निषधो हेमकूटो हिमालय इति प्रागायता यथा नीलादयः ॥ अयुतयोजनोत्सेधा हरिवर्षकिंपुरुषभारतानां यथासंख्यं ॥९॥ तथैवेलावृतमपरेण

पूर्वेणचमाल्यवद्गंधमादनावानीलनिषधायतौद्विसहस्रंपप्रथतुः॥१०॥केतुमा
लभद्राश्वयोःसीमानंविदधाते॥११॥मंदरोमेरुमंदरःसुपार्श्वःकुमुदइतिअयुतयो
जनविस्तारोन्नाहा॥मेरोश्चतुर्दिशमवष्टंभगिरयउपक्लृप्ताः॥१२॥चतुर्ष्वेतेषुचू
तजंबूकदंबन्यग्रोधाश्चत्वारःपादपप्रवराःपर्वतकेतवइवअधिकसहस्रयोज
नोन्नाहास्तावद्विटपविततयःशतयोजनपरिणाहाः॥१३॥ह्रदाश्चत्वारःपयो
मध्विक्षुरसमृष्टजलायदुपस्पर्शिनउपदेवगणायोगैश्वर्याणिस्वाभाविकानि
भरतर्षभधारयंति॥१४॥देवोद्यानानिचभवंतिचत्वारिनंदनंचैत्ररथंवैभ्राज
कंसर्वतोभद्रमिति॥१५॥येष्वमरपरिवृढाःसहसुरललनाललामयूथपतय
उपदेवगणैरुपगीयमानमहिमानःकिलविहरंति॥१६॥मंदरोत्संगएकादश

शत्तयोजनोत्तुंगदेवचूतशिरसोगिरिशिखरस्थूलानिफलान्यमृतकल्पा
निपतंति॥१७॥तेषांविशीर्यमाणानामतिमधुरसुरभिसुगंधिबहुलारुण
रसोदेनारुणोदानामनदीमंदरगिरिशिखरान्निपतंतीपूर्वेणेलावृतमु
पप्लावयति॥१८॥यदुपजोषणाद्भवान्याअनुचरीणांपुण्यजनवधूनामव
यवस्पर्शसुगंधवातोदशयोजनंसमंतादनुवासयति॥१९॥एवंजंबूफला
नामत्युच्चनिपातविशीर्णानामनस्थिप्रायाणामिभकायनिभानांरसेनजं
बूनामनदीमेरुमंदरशिखरादयुताधिकयोजनादवनितलेनिपतंतीदक्षि
णेनात्मानंयावदिलावृतमुपस्यंदति॥२०॥तावदुभयोरपिरोधसोर्यामृत्तिका
ग रसेनानुविध्यमानावाय्वर्कसंयोविपाकेनसदामरलोकाभरणंजांबूनदं

नामसुवर्णंभवति॥२१॥यदुहवावविबुधादयःसहयुवतिभिर्मुकुटकटकक
टिसूत्राद्याभरणरूपेणखलुधारयंति॥२२॥यस्तुमहाकदंबःसुपार्श्वशि
खरनिरूढोयास्तस्यकोटरेभ्योविनिसृताःपंचायामपरिणाहाःपंचमधुधा
राःसुपार्श्वशिखरात्पतंत्योऽपरेणात्मानमिलावृतमनुमोदयंति॥२३॥या
ह्युपयुंजानानांमुखनिर्वासितोवायुःसमंताच्छतयोजनमनुवासयति॥२४॥
एवंकुमुदनिरूढोयःशतवल्शोनामवटस्तस्यस्कंधेभ्योनीचीनाःपयोद
धिघृतमधुगुडान्नाद्यंबरशय्यासनाभरणादयःसर्वएवकामदुघानदाः
कुमुदाग्रात्पतंतस्तमुत्तरेणेलावृतमुपयोजयंति॥२५॥यानुपजुषाणानां
नकदाचिदपिप्रजानांवलीपलितक्लमस्वेददौर्गंध्यजरामयमृत्युशीतो

स्मैवैवर्ण्योपसर्गादयस्तापविशेषाभवंति ॥ यावज्जीवंसुखंनिरतिशयमे
व ॥ २६ ॥ कुरंगकुररकुसुंभवैकंकत्रिकूटशिशिरपतंगरुचकनिषधशिनी
वासकपिलशंखवैदूर्यजारुधिहंसर्षभनागकालजरनारदादयोविंशति
गिरयोमेरोःकर्णिकायाइवकेसरभूतामूलदेशेपरितउपक्लृप्ताः ॥ २७ ॥ ज
ठरदेवकूटौमेरुपूर्वेणाष्टादशयोजनसहस्रमुदगायतौद्विसहस्रंपृथुतुं
गौभवतः ॥ एवमपरेणपवनपारियात्रौदक्षिणेनकैलासकरवीरौप्रागा
यतौएवमुत्तरतस्त्रिशृंगमकरौअष्टाभिरेतैःपरिश्रितोग्निरिवपरितश्चका
स्तिकांचनगिरिः ॥ २८ ॥ मेरोर्मूर्द्धनिभगवतआत्मयोनेर्मध्यतउपक्लृप्तांपु
रीमयुतयोजनसाहस्रींसमचतुरस्रांशातकौंभींवदंति ॥ २९ ॥ तामनुपरितो

लोकपालानामष्टानां यथादिशं यथारूपं ॥ तुरीयमानेन पुरोष्टावुपक्लृप्ताः ॥
॥३०॥ इति श्रीभागवते महापुराणे पंचमस्कंधे भुवनकोशवर्णनंनाम षोडशोध्यायः
॥१६॥ ॥ ततः सप्तदशे गंगागमनं तत्र चतुर्द्दिशं ॥ इलावृते च रुद्रेण संकर्षण
निसेवनं ॥१॥ शुक उवाच ॥ तत्र भगवतः साक्षाद्यज्ञलिंगस्य विष्णोर्विक्रमतो
वामपादांगुष्ठनखनिर्भिन्नोर्ध्वांडकटाहविवरेणांतःप्रविष्टा या बाह्यजल
धारा तच्चरणपंकजावनेजनारुणकिंजल्कोपरंजिताखिलजगदघमलाप
होपस्पर्शनामला साक्षाद्भगवत्पदीत्यनुपलक्षितवचोभिधीयमानाति
महता कालेन युगसहस्रोपलक्षणेन दिवो मूर्द्धन्यवततार ॥१॥ यत्तद्विष्णु
पदमाहुः ॥ यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतोस्मत्कुलदेवता

चरणारविंदोदकमितियामनुसवनमुत्कृष्यमाणभगवद्भक्तियोगेनदृढंक्लि
द्यमानांतर्हृदयऔत्कंठ्यविवशामीलितलोचनयुगलकुड्मलविगलिता
मलबाष्पकलयाऽभिव्यज्यमानरोमपुलककुलकअधुनापिपरमादरेण
शिरसाविभर्त्ति ॥२॥ ततःसप्तऋषयस्तत्प्रभावाभिज्ञायांननुतपसआत्यं
तिकीसिद्धिरेतावतीभगवतिसर्वात्मनिवासुदेवेनुपरतभक्तियोगलाभेने
वोपेक्षितान्यार्थात्मगतयोमुक्तिमिवागतांमुमुक्षवइवसबहुमानमद्यापि
जटाजूटैरुद्वहंति ॥३॥ ततोनेकसहस्रकोटिविमानानीकसंकुलदेवयाने
नावतरंतींदुमंडलमावार्य्यब्रह्मसदनेनिपतति ॥४॥ तत्रचतुर्द्धाभिद्यमाना
चतुर्भिर्नामभिश्चतुर्दिशमभिस्पंदतीनदनदीपतिमेवाभिनिविशति ॥५॥

सीताऽलकनंदाचक्षुभद्रेति ॥ सीतातुब्रह्मसदनात्केसराचलादिगिरिशिख
रेभ्योऽधोधःप्रस्रवंतीगंधमादनमूर्द्धसु ॥ पतित्वाअंतरेणभद्राश्ववर्षंप्राच्यां
दिशिक्षारसमुद्रमभिप्रविशति ॥५॥ एवंमाल्यवत्शिखरान्निपतंतीततउपर
तवेगाकेतुमालमभिचक्षुःप्रतीच्यांदिशिसरित्पतिंप्रविशति ॥६॥ भद्राचोत्त
रतोमेरुशिरसोनिपतितागिरिशिखराद्गिरिशिखरमतिहायशृंगवतःशृंगा
दवस्यंदमानाउत्तरांस्तुकुरूनभितउदीच्यांदिशिजलधिमभिप्रविशति ॥७
तथैवालकनंदादक्षिणेनब्रह्मसदनाद्बहूनिगिरिकूटान्यतिक्रम्यहेमकू
टान्यतिरभसतररंहसालुठयंतीभारतमभिवर्षंदक्षिणस्यांदिशिजलधि
मभिप्रविशति ॥८॥ यस्यांस्नानार्थंपानार्थंवागच्छतःपुंसःपदेपदेश्वमेधराजसू

यादीनांफलंनदुर्लभमिति॥अन्येचनदानद्यश्चवर्षेवर्षेसंतिबहुशोमेर्वा
दिगिरिदुहितरःशतशः॥१०॥तत्रापिभारतमेववर्षंकर्मक्षेत्रमन्यान्यष्टव
र्षाणिस्वर्गिणांपुण्यशेषोपभोगस्थानानिभौमानिस्वर्गपदानिव्यपदिशं
ति॥११॥एषुपुरुषाणामयुतपुरुषायुर्वर्षाणांदेवकल्पानांनागायुतप्राणा
नांवज्रसंहननबलवयोमोदप्रमुदितमहासौरतमिथुनव्यवायापवर्गव
र्षधृतैकगर्भकलत्राणांतत्रतुत्रेतायुगसमःकालोवर्त्तते॥१२॥यत्रहदेव
पतयःस्वैःस्वैर्गणनायकैर्विहितमहार्हणाःसर्वर्तुकुसुमस्तबकफलकि
सलयश्रियानम्यमानविटपलताविटपिभिरुपशुंभमानरुचिरकान
नाश्रमायतनवर्षगिरिद्रोणीषुतथाचामलजलाशयेषुविकचविविधन

ववनरुहामोदमदमुदितराजहंसजलकुक्कुटकारंडवसारसचक्रवाका
दिभिर्मधुकरनिकराकृतिभिरुपकूजितेषुजलक्रीडादिभिर्विचित्रविनो
दैःसुललितसुरसुंदरीणांकामकलिलविलासहासलीलावलोकाकृष्ट
मनोदृष्टयःस्वैरंविहरंति॥१३॥नवस्वपिवर्षेषुभगवान्नारायणोमहापुरुषः
पुरुषाणांतदनुग्रहायात्मतत्वव्यूहेनात्मनाद्यापिसंनिधीयते॥१४॥इला
वृतेतुभगवान्भवएकएवपुमान्नह्यन्यस्तत्रापरोनिर्विशतिभवान्याःशा
पनिमित्तज्ञःयत्प्रवेक्ष्यतःस्त्रीभावस्तत्पश्चाद्वक्ष्यामि॥१५॥भवानीनाथैःस्त्री
गणार्बुदसहस्रैरवरुध्यमानोभगवतश्चतुर्मूर्त्तेर्महापुरुषस्यतुरीयांताम
सींमूर्त्तिंप्रकृतिमात्मनःसंकर्षणसंज्ञामात्मसमाधिरूपेणसंनिधाप्यैतदभि

गृणन्नुभवउपधावति ॥१६॥ श्रीभगवानुवाच ॥ ॐ नमोभगवतेमहापुरुषाय
सर्वगुणसंख्यानायानंतायाव्यक्तायनमइति ॥१७॥ भजेभजन्यारणपा
दपंकजंभगस्यकृत्स्नस्यपरंपरायणं ॥ भक्तेष्वलंभावितभूतभावनंभ
वापहंत्वाभवभावमीश्वरं ॥१८॥ नयस्यमायागुणचित्तवृत्तिभिर्निरीक्षतो
ह्यण्वपिदृष्टिरज्यते ॥ ईशेयथानोऽजितमन्युरंहसांकस्तंनमन्येतजिगीषु
रात्मनः ॥१९॥ असद्दृशोयःप्रतिभातिमाययाक्षीवेवमध्वासवताम्रलो
चनः ॥ ननागवध्वोर्हणईशिरेह्रियायत्पादयोःस्पर्शनधर्षितेंद्रियाः ॥२०॥
यमाहुरस्यस्थितिजन्मसंयमंत्रिभिर्विहीनंयमनंतमृषयः ॥ नवेदसिद्धार्थ
मिवक्वचित्स्थितंभूमंडलंमूर्द्धसहस्रधामसु ॥२१॥ यस्याद्यआसीद्गुण

विगृहोमहान्‌विज्ञानधिष्ण्योभगवानजःकिल ॥ यत्संभवोहंत्रिवृतास्वतेज
सावैकारिकंतामसमैंद्रियंसृजे ॥२२॥ एतेवयंयस्यवशेमहात्मनःस्थिताः
शंकुताइवसूत्रयंत्रिताः ॥ महानहंवैकृततामसेंद्रियाःसृजामसर्वेयदनु
ग्रहादिदं ॥२३॥ यन्निर्मितांकर्ह्यपिकर्मपर्वणींमायांजनोयंगुणसर्गमोहि
तः ॥ नवेदनिस्तारणयोगमंजसा तस्मैनमस्तेविलयोदयात्मने ॥२४॥ ॥
इतिश्रीभागवतेमहापुराणेपंचमस्कंधेभुवनकोशवर्णनंनामसप्तद
शोध्यायः ॥१७॥ अष्टादशोततोमेरोःपूर्वादिक्रमतस्त्रिषु ॥ त्रिषुचोत्तरवर्षे
षुसेव्यसेवकवर्णनं ॥१॥ श्रीशुकउवाच ॥ तथाचभद्रश्रवानामँसुतस्त
कुलपतयःपुरुषाभद्राश्ववर्षेसाक्षाद्भगवतोवासुदेवस्यप्रियांतनूंध

धर्म

र्ममयींहयशीर्षाभिधानांपरमेणसमाधिनासंनिधाप्येदमभिगृणंत
उपधावंति॥१॥भद्रश्रवसऊचुः॥ॐनमोभगवतेधर्मायात्मविशोधना
यनमइति॥२॥अहोविचित्रंभगवद्विचेष्टितंघ्नंतंजनोयंहिमिषन्नप
श्यति॥ध्यायन्नसद्यर्हिविकर्मसेवितुंनिर्हत्यपुत्रंपितरंजिजीविषुः॥
३॥वदंतिविश्वंकवयःस्मनश्वरंपश्यंतिचाध्यात्मविदोविपश्चितः॥तथा
पिमुह्यंतितवाजमाययासुविस्मितंकृत्यमजंनतोस्मितं॥४॥विश्वोद्भ
वस्थाननिरोधकर्मतेह्यकर्तुरंगीकृतमप्यपावृतः॥युक्तंनचित्रंत्वयिका
र्यकारणेसर्वात्मनिव्यतिरिक्तेचवस्तुतः॥५॥वेदान्युगांतेतमसातिरस्कृ
तान्रसातलाद्योनृतुरंगविग्रहः॥प्रत्याददेवैकवयेभियाचतेतस्मैनमस्ते

वितयेहितायतइति ॥६॥ हरिवर्षेचापिभगवान्नरहरिरूपेणास्ते तद्रूपग्रहणनि
मित्तमुत्तरत्राभिधास्ये ॥ तद्दयितंरूपंमहापुरुषगुणभाजनोमहाभागवतोदे
त्यदानवकुलतीर्थीकरणशीलाचरितःप्रह्लादोव्यवधानानन्यभक्तियोगेन
सहतद्वर्षपुरुषैरुपास्ते ॥ इदंचोदाहरति ॥ ॐनमोभगवतेनरसिंहायनमस्ते
जस्तेजसेआविराविर्भववज्रनखवज्रदंष्ट्रकर्माशयान्रंधयरंधयतमोग्रस
॥ ओंस्वाहा ॥ अभयमभयआत्मनिभूयिष्ठाःओंक्ष्रौंह्रौं ॥८॥ स्वस्त्यस्तुविश्वस्य
खलःप्रसीदतांध्यायंतुभूतानिशिवंमिथोधिया ॥ मनश्चभद्रंभजतादधोक्ष
जआवेश्यतांनोमतिरप्यहैतुकी ॥९॥ मागारदारात्मजवित्तबंधुषुसंगोय
दिस्याद्भगवत्प्रियेषुनः ॥ यःप्राणवृत्त्यापरितुष्टआत्मवान्सिध्यत्यदूरान्न

तथेंद्रियप्रियः ॥१०॥ यत्संगलब्धं निजवीर्यवैभवं तीर्थं मुहुः संस्पृशतां हिमा
नसं ॥ हरत्यजोंतःश्रुतिभिर्गतोंगजं को वै न सेवेत मुकुंदविक्रमं ॥११॥ यस्या
स्ति भक्तिर्भगवत्यकिंचना सर्वैर्गुणैस्तत्र समासते सुराः ॥ हरावभक्तस्य कुतो
महद्गुणा मनोरथेनासति धावतो बहिः ॥१२॥ हरिर्हि साक्षाद्भगवान् शरी
रिणामात्मा झषाणामिव तोयमीप्सितं ॥ हित्वा महांस्तं यदि सज्जते गृहे
तदा महत्त्वं वयसा दंपतीनां ॥१३॥ तस्माद्रजोरागविषादमन्युमानस्पृ
हाभयदैन्याधिमूलं ॥ हित्वा गृहं संसृतिचक्रवालं नृसिंहपादं भजताऽ
कुतोभयमिति ॥१४॥ केतुमाले भगवान्कामदेवस्वरूपेण लक्ष्म्याः प्रियचि
कीर्षया ॥ प्रजापतेर्दुहितॄणां पुत्राणां तद्वर्षपतीनां पुरुषौहोरात्रपरिसंख्या

युषा १

युषा

॥भा॰पं॰॥
॥५४॥

णानांयासांगर्भामहापुरुषमहास्त्रतेजसोद्विजितमनसांविध्वस्ताव्यसवः
संवत्सरांतेविनिपतंति॥१५॥अतीवसुललितगतिविलासविलसितरुचिर
हासलेशावलोकलीलयाकिंचिदुत्तंभितसुंदरभ्रूमंडलसुभगवदनारविं
दश्रियारमांरमयन्निंद्रियाणिरमयते॥१६॥तद्भगवतोमायामयंरूपं
परमसमाधियोगेनरमादेवीसंवत्सरस्यरात्रिषुप्रजापतेर्दुहितृभिरुपेता
हःसुच॥तद्भर्तृभिरुपास्तेइदंचोदाहरति॥१७॥ॐह्रांह्रींह्रैंह्रूंॐनमोभग
वतेहृषीकेशायसर्वगुणविशेषैर्विलक्षितात्मनेआकूतीनांचित्तीनांचे
तसांविशेषाणांचाधिपतयेषोडशकलायच्छंदोमयायान्नमयायामृत
मयायसर्वमयायसहसे॥ओजसेबलायकांतायकामायनमस्तेउभयत्र

अ॰१८

॥राम॰॥
॥५४॥

भूयात्॥१८॥स्त्रियो व्रतैस्त्वा हृषीकेश्वरं स्वतो ह्याराध्य लोके पतिमाशा
सतेऽन्यं॥तासां न ते वै परिपांत्यपत्यं प्रियं धनायूंषि यतोस्वतंत्राः॥१९॥
स वै पतिं स्यादकुतोभयः स्वयं समंततः पाति भयातुरं जनं॥ स एक एवेत
रथा मिथो भयं नैवात्मलाभादधिमन्यते परं॥२०॥या तस्य ते पादसरोरु
हार्हणं निकामयेत्साखिलकर्मलंपटा॥ तदेव रासीप्सितमीप्सितोर्चितो
यद्भग्नयाच्ञो भगवन्प्रतप्यते॥२१॥मत्प्राप्तयेजेशसुरासुरादयस्तप्यं
त उग्रं तप ऐंद्रिये धियः॥ ऋते भवत्पादपरायणान्न मां विंदंत्यहं त्वद्धृद
याय तो जित॥२२॥स त्वं ममाप्यच्युत शीर्ष्णि वंदितं करांबुजं यत्त्वदधायि
सात्वतां॥बिभर्षि मां लक्ष्म वरेण्य मायया क ईश्वरस्येहितमूहितुं विभुरिति

२३॥रम्यकेचभगवतःप्रियतमंमत्स्यमवताररूपंतद्वर्षपुरुषस्यमनोःप्राक्
प्रदर्शितंसइदानीमपिमहताभक्तियोगेनाराधयतीदंचोदाहरति॥२४॥
ॐनमोभगवतेमुख्यतमायनमःसत्वायप्राणायौजसेसहसेबलाय
महामत्स्यायनमइति॥२५॥अंतर्बहिश्चाखिललोकपालकैरदृष्टरूपो
विचरस्युरुस्वनः॥सईश्वरस्त्वंयइदंवशेनयन्नाम्नायथादारुमयींनरःस्त्रि
यं॥२६॥यंलोकपालाःकिलमत्सरज्वराहित्वायतंतोपिपृथक्समेत्यच॥
पातुंनशेकुर्द्विपदश्चतुष्पदःसरीसृपंस्थाणुयदत्रदृश्यते॥२७॥भवान्यु
गांतार्णवऊर्मिमालिनिक्षोणीमिमामोषधिवीरुधांनिधिं॥मयासहोरुक्रम
तेजओजसातस्मैजगत्प्राणगणात्मनेनमइति॥२८॥हिरण्मयेपिभगवान्नि

वसतिकूर्मतनुंबिभ्राणस्तस्यतत्प्रियतमांतनुमर्यमासहवर्षपुरुषैःपि
तृगणाधिपतिरुपधावतिमंत्रमिमंचानुजपति॥२९॥ॐनमोभगवतेअ
कूपारायसर्वसत्वगुणविशेषणायनोपलक्षितस्थानायनमोवर्ष्मणेन
मोभूम्नेनमोनमोवस्थानायनमस्ते॥३०॥यद्रूपमेतन्निजमाययार्पितम
र्थस्वरूपंबहुरूपरूपितं॥संख्यानयस्यास्त्ययथोपलंभनात्तस्मैनमस्ते
व्यपदेशरूपिणे॥३१॥जरायुजंस्वेदजमंडजोद्भिदंचराचरंदेवर्षिपितृभू
तमैंद्रियं॥द्यौःखंक्षितिःशैलसरित्समुद्रद्वीपग्रहर्क्षेत्यभिधेयएकः॥३२॥
॥यस्मिन्नसंख्येयविशेषनामरूपाकृतौकविभिःकल्पितेयं॥संख्याययया
तत्वदृशापनीयतेतस्मैनमःसांख्यनिदर्शनायतइति॥३३॥उत्तरेषुचकुरु

षुभगवान्यज्ञपुरुषःकृतवाराहरूपआस्ते॥तंतुदेवीहैषाभूःसहकुरुभिरस्ख
लिनभक्तियोगेनोपधावति॥इमांचपरमामुपनिषदमावर्त्तयति॥३४॥ॐन
मोभगवतेमंत्रतत्वलिंगाययज्ञक्रतवेमहाध्वरावयवायमहापुरुषायन
मः॥कर्मशुक्लायत्रिगुणायनमस्ते॥३५॥यस्यस्वरूपंकवयोविपश्चितोगु
णेषुदारुष्विवजातवेदसं॥मथ्नंतिमथ्नामनसादिदृक्षवोगूढंक्रियार्थैर्न
मईरितात्मने॥३६॥द्रव्यक्रियाहेत्वयनेशकर्तृभिर्मायागुणैर्वस्तुनिरीक्षिता
त्मने॥अन्वीक्षयांगातिशयात्मबुद्धिभिर्निरस्तमायाकृतयेनमोनमः॥३७॥
करोतिविश्वस्थितिसंयमोदयंयस्येप्सितंनेप्सितमीक्षितुर्गुणैः॥माया
यथायोभ्रमतेतदाश्रयंग्राव्णोनमस्तेगुणकर्मसाक्षिणे॥३८॥प्रमथ्य

दैत्यंप्रतिवारणंमृधेयोमांरसायाजगदादिसूकरः॥कृत्वाग्रदंष्ट्रेनिरगा
दुदन्वतःक्रीडन्निवेभःप्रणतास्मितंविभुमिति॥३९॥इतिश्रीभागवतेम
हापुराणेपंचमस्कंधेअष्टादशोध्यायः॥१८॥ऊनविंशेकिंपुरुषेभारतेचो
पवर्ण्यते॥सेव्यसेवकभावश्चभारतेश्रेष्ठ्यमेवच॥१॥श्रीशुकउवाच॥किं
पुरुषेवर्षेभगवंतंआदिपुरुषंलक्ष्मणाग्रजंसीताभिरामंतच्चरणसं
निकर्षाभिरतःपरमभागवतोहनुमान्सहकिंपुरुषैरविरतभक्तिरुपा
स्ते॥१॥आर्ष्टिषेणेनसहगंधर्वैरनुगीयमानांपरमकल्याणींभर्तृभगव
त्कथांसमुपशृणोतिस्वयंचेदंगायति॥२॥ॐनमोभगवतेउत्तमश्लोका
यनमआर्यलक्षणशीलव्रतायनमउपशिक्षितात्मनेउपासितलोकाय

स्व

नमःसाधुवादनिकषणायनमोब्रह्मण्यदेवायमहापुरुषायमहाराजायन
मइति॥३॥यत्तद्विशुद्धानुवमात्रमेकंस्वतेजसाध्वस्तगुणव्यवस्थं॥प्रत्यक्प्रशां
तंसुधियोपलंभनंह्यनामरूपंनिरहंप्रपद्ये॥४॥मर्त्यावतारस्त्विहमर्त्यशिक्ष
णंरक्षोवधायैवनकेवलंविभोः॥कुतोन्यथास्याद्रमतःस्वआत्मनःसीताकृ
तानिव्यसनानीश्वरस्य॥५॥नवैसआत्मात्मवतांसुहृत्तमःसक्तस्त्रिलोक्यां
भगवान्वासुदेवः॥नस्त्रीकृतंकश्मलमश्नुवीतनलक्ष्मणंचापिविहातुमर्ह
ति॥६॥नजन्मनूनंमहतोनसौभगंनवाङ्नबुद्धिर्नाकृतिस्तोषहेतुः॥तैर्यद्वि
सृष्टानपिनोवनौकसश्चकारसख्येबतलक्ष्मणाग्रजः॥७॥सुरोसुरोवाप्यथ
वानरोनरःसर्वात्मनायःसुकृतज्ञमुत्तमं॥भजेनरामंमनुजाकृतिंहरिंयउ

त्तराननयत्कोशलानुद्दिवमिति ॥८॥ भारतेपिवर्षेभगवान्नरनारायणाख्य
आकल्पांतमुपचितधर्म्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनु
ग्रहायात्मवतामनुकंपयातपोऽव्यक्तगतिश्चरति ॥९॥ तंभगवान्नारदोवर्णा
श्रमवतीभिर्भारतीभिःप्रजाभिर्भगवत्प्रोक्ताभ्यांसांख्ययोगाभ्यांभगवदनु
भावोपवर्णनंसावर्णेरुपदेक्ष्यमाणःपरमभक्तिभावेनोपसरति ॥१०॥ ॐन
मोभगवतेउपशमशीलायोपरतानात्म्यायनमोकिंचनवित्तायऋषिऋ
षभायनरनारायणायपरमहंसपरमगुरवेआत्मारामाधिपतयेनमो
नमइतिगायतिचेदं ॥११॥ कर्त्तास्यसर्गादिषुयोनबध्यतेनहन्यतेदेहगतोपि
देहिकैः ॥ द्रष्टुर्नदृग्यस्यगुणैर्विदूष्यतेतस्मैनमोसक्तविविक्तसाक्षिणे ॥१२॥

इदंचाभिगृण
ति

ष्टुं हि योगेश्वर योगनैपुणं हिरण्यगर्भो भगवान् जगाद यत् ॥ यदंतकाले त्वयि
निर्गुणे मनो भक्त्यादधीतोज्झितदुःकलेवरः ॥१३॥ यथैहिकामुष्मिककामलंप
टः सुतेषु दारेषु धनेषु चिंतयन् ॥ शंकेत विद्वान् कुकलेवरात्ययाद्यस्तस्य य
त्नः श्रम एव केवलं ॥१४॥ तन्नः प्रभो त्वं कुकलेवरार्पितां त्वन्माययाहंममता
मधोक्षज ॥ भिंद्याम येनाशु वयं सुदुर्भिदां विधेहि योगं त्वयि नः स्वभावजमि
ति ॥१५॥ भारते प्यस्मिन्वर्षे सरिच्छैलाः संति हि बहवः ॥ मलयो मंगलप्रस्थो
मैनाकस्त्रिकूट ऋषभः कूटकः कोल्लकः सह्यो देवगिरिर्ऋष्यमूकः श्रीशैलो
व्यंकटो महेंद्रो वारिधारो विंध्यः शुक्तिमानृक्षगिरिः पारियात्रो द्रोणश्चित्र
कूटो गोवर्द्धनो रैवतकः ककुभो नीलो गोकामुख इंद्रकीलः कामगिरिरिति

चान्येचशतसहस्रशःशैलास्तेषांनितंबप्रभवानदानद्यश्चसंत्यसंख्या
ताः॥१६॥एतासामपोभारत्यःप्रजानामभिरेवपुनंतीनामात्मनाचोपस्पृशं
ति॥१७॥चंद्रवशाताम्रपर्णीअवटोदाकृतमालावेहायसीकावेरीवेणापय
स्विनीशर्करावर्तातुंगभद्राकृष्णावेणाभीमरथीगोदावरीनिर्विंध्यापयोष्णी
तापीरेवासुरसानर्मदाचर्मण्वतीसिंधुःअंधःशोणश्चनदौमहानदीवेदस्मृ
तिऋषिकुल्यात्रिसामाकौशिकीमंदाकिनीयमुनासरस्वतीदृषद्वतीगो
मतीसरयूरोधवतीसप्तवतीसुषोमाशतद्रूश्चंद्रभागामरुद्वृधावितस्ताअ
सिक्नीविश्वेतिमहानद्यः॥१८॥अस्मिन्नेववर्षेपुरुषैर्लब्धजन्मभिःशुक्ललो
हितकृष्णवर्णेनस्वारब्धेनकर्मणादिव्यमानुषनारकगतयोबह्व्यआत्मन

आनुपूर्व्येणसर्वाह्येवसर्वेषांविधीयंते॥यथावर्णविधानमपवर्गश्चापिभव
ति॥१९॥योसौभगवतिसर्वभूतात्मन्यनात्म्येनिरुक्तेनिलयनेपरमात्मनिवा
सुदेवेऽनन्यनिमित्तभक्तियोगलक्षणोनानागतिनिमित्ताविद्याग्रंथिरंधन
द्वारेणयदाहिमहापुरुषपुरुषप्रसंगः॥२०॥एतदेवहिदेवागायंति॥अहोअ
मीषांकिमकारिशोभनंप्रसन्नएषांस्विदुतस्वयंहरिः॥येर्जन्मलब्धंनृषुभा
रताजिरेमुकुंदसेवौपयिकंस्पृहाहिनः॥२१॥किंदुष्करैर्नःक्रतुभिस्तपोव्रतै
र्दानादिभिर्वाद्युजयेनफल्गुना॥नयत्रनारायणपादपंकजस्मृतिःप्रमुष्टा
तिशयेंद्रियोत्सवात्॥२२॥कल्पायुषांस्थानजयात्पुनर्भवात्क्षणायुषांभा
रतभूजयोवरं॥क्षणेनमर्त्येनकृतंमनस्विनःसंन्यस्यसंयांत्यभयंपदंहरेः॥२३॥

नयत्रवैकुंठकथासुधापगानसाधवोभागवतास्तदाश्रयाः।।नयत्रयज्ञेश
मखामहोत्सवाःसुरेशलोकोपिनवैससेव्यतां।।२४।।प्राप्तानृजातिंत्विहये
चजंतवोज्ञानक्रियाद्रव्यकलापसंभृतां।।नवैयतेरन्नपुनर्भृतायतेभूयोव
नौकाइवयांतिबंधनं।।२५।।येश्रद्धयाबर्हिषिभागशोहविर्निरुप्तमिष्टंविधि
मंत्रवस्तुतः।।एकःपृथङ्नामभिराहुतोमुदागृह्णातिपूर्णःस्वयमाशिषांप्र
भुः।।२६।।सत्यंदिशत्यर्थितमर्थितोनृणांनैवार्थदोयत्पुनरर्थितायतः।।स्व
यंविधत्तेभजतामनिच्छतामिच्छापिधानंनिजपादपल्लवं।।२७।।यद्यत्रनःस्व
र्गसुखावशेषितंस्विष्टस्यसूक्तस्यकृतस्यशोभनं।।तेनाजनाभेस्मृतिम
ज्जन्मनःस्याद्वर्षेहरिर्यद्भजतांशंतनोति।।२८।।श्रीशुकउ०।।जंबूद्वीपस्यच

राजन्नुपद्वीपानष्टौहैकउपदिशंति ॥ सगरात्मजैरश्वान्वेषणइमांमहींपरि
तोनिखनद्भिरुपकल्पितान् ॥२९॥ तद्यथास्वर्णप्रस्थश्चंद्रशुक्लआवर्त्तनोरम
णकोमंदरहरिणःपांचजन्यःसिंहलोलंकेति ॥३०॥ एवंतवभारतोत्तमजंबूद्वीप
वर्षविभागोयथोपदेशमुपवर्णितइति ॥३१॥ ॥ इति श्रीभागवतेमहापुराणे
पंचमस्कंधेभुवनकोशेजंबूद्वीपवर्णनंनामेकोनविंशोध्यायः ॥ १९॥ ॥
विंशेप्लक्षादिषड्द्वीपस्थितिमाहसहार्णवैः ॥ लोकालोकस्थितिंचांतर्बहि
र्भागादिमानतः ॥१॥ ऋषिरुवाच ॥ अतःपरंप्लक्षाद्वादीनांप्रमाणलक्षणसं
स्थानतोवर्षविभागउपवर्ण्यते ॥१॥ जंबूद्वीपोयंयावत्प्रमाणविस्तारस्तावता
क्षारोदधिनापरिवेष्टितोयथामेरुर्जंब्वाख्येन । लवणोदधिरपिततोद्विगुण

विशालेन प्लक्षाख्येन परिक्षिप्तो यथा परिखा बाह्योपवनेन प्लक्षो जंबूप्रमा
णो द्वीपाख्याकरो हिरण्मय उत्थितो यत्राग्निरुपास्ते सप्तजिह्वस्तस्याधिप
तिः प्रियव्रतात्मज इध्मजिह्वः स्वं द्वीपं सप्तवर्षाणि विभज्य सप्तवर्षनामभ्य
आत्मजेभ्य आकलय्य स्वयमात्मयोगेनोपरराम ॥ २ ॥ शिवं यवयसं सुभ
द्रं शांतं क्षेममममृतमभयमिति वर्षाणि तेषु गिरयो नद्यश्च सप्तैवाभिज्ञाताः
॥ ३ ॥ मणिकूटो वज्रकूट इंद्रसेनो ज्योतिष्मान्सुपर्णो हिरण्यष्ठीवो मेघमाल
इति सेतुशैलाः अरुणा नृम्णांगिरसी सावित्री सुप्रभाता ॥ ऋतंभरा सत्यं
भरेति महानद्यः ॥ यासां जलोपस्पर्शनविधूतरजस्तमसो हंसपतंगोर्ध्वाय
नसत्यांगसंज्ञाश्चत्वारो वर्णाः सहस्रायुषो विबुधो विबुधोपमसंदर्शनप्र

जननाःस्वर्गद्वारंत्रय्याविद्ययाभगवंतंत्रयीमयंसूर्यमात्मानंयजंते॥४॥प्रत्न
स्यविष्णोरूपंयत्सत्यस्यर्त्तस्यब्रह्मणः॥अमृतस्यचमृत्योश्चसूर्यमात्मान
मीमहीति॥५॥प्लक्षादिषुपंचसुपुरुषाणामायुरिंद्रियमोजःसहोबलंबुद्धि
र्विक्रमइतिचसर्वेषामौत्पत्तिकीसिद्धिरविशेषेणवर्त्तते॥६॥प्लक्षःस्वसमा
नेनेक्षुरसोदेनावृतोयथातथाद्वीपोपिशाल्मलोद्विगुणविशालःसमानेन
सुरोदेनावृतःपरिवृंक्ते॥७॥यत्रहवैशाल्मलीप्लक्षायामायस्यांवावकिलनिल
यमाहुर्भगवतःछंदःस्तुतःपतत्रिराजस्यसाद्वीपहूतयउपलक्ष्यते॥८॥तद्द्वीपा
धिपतिःप्रियव्रतात्मजोयज्ञबाहुःस्वसुतेभ्यःसप्तभ्यस्तन्नामानिसप्तवर्षाणि
व्यभजत्सुरोचनंसौमनस्यंरमणकंदेववर्षंपारिभद्रमाप्यायनमविज्ञातमि
तितेषुवर्षाद्रयोनद्यश्चसप्तैवाभिज्ञाताः॥स्वरसःशतशृंगोवामदेवःकुंदःकुमुदःपुष्पवर्षःसह

स्रश्रुति

ति॥ अनुमतीशिनीवालीसरस्वतीकुहूरजनीनंदाराकेति॥१०॥ तद्वर्षपुरु
षाःश्रुतधरवीर्यधरवसुंधरेषुंधरसंज्ञाभगवंतंवेदमयंसोममात्मानंवेदेनय
जंते॥११॥ स्वगोभिःपितृदेवेभ्योविभजन्कृष्णशुक्लयोः॥ प्रजानांसर्वासांराजां
धःसोमोनअस्त्विति॥१२॥ एवंसुरोदाद्बहिस्तद्द्विगुणसमानेनावृतोघृतो
देनयथापूर्वःकुशद्वीपोयस्मिन्कुशस्तंबोदेवकृतस्तद्वीपाख्यापनोज्वल
नइवापरःस्वशष्परोचिषादिशोविराजयति॥१३॥ तद्द्वीपपतिःप्रैयव्रतोराज
न्हिरण्यरेतोनामास्वंद्वीपंसप्तभ्यःस्वपुत्रेभ्योयथाभागंविभज्यस्वयंतपआ
तिष्ठत॥१४॥ वसुवसुदानदृढरुचिनाभिगुप्तस्तुत्यव्रतविविक्तनामदेवनाम
भ्यस्तेषांवर्षेषुसीमागिरयोनद्यश्चाभिज्ञाताःसप्तसप्तैवचक्रश्चतुःशृंगःकपि

लश्चित्रकूटोदेवानीकऊर्द्ध्वरोमाद्रविणइतिरसकुल्यामधुकुल्यामित्रविंदाश्रु
तविंदादेवगर्भाघृतच्युतामंत्रमालेति ॥ यासांपयोभिःकुशद्वीपोकसःकुशल
कोविदाभियुक्तकुलकसंज्ञाभगवंतंवासुदेवंजातवेदःस्वरूपिणंकर्मकौशले
नयजंते ॥ १६ ॥ परस्यब्रह्मणःसाक्षाज्जातवेदोसिहव्यवाट् ॥ देवानांपुरुषांगा
नांयज्ञेनपुरुषंयजेति ॥ १७ ॥ तथाबहिःक्रौंचद्वीपोद्विगुणस्वमानेनक्षीरोद
नपरितःउपक्लृप्तःवृतोयथाकुशद्वीपोघृतोदेन ॥ यस्मिन्क्रौंचोनामपर्वतरा
जोद्वीपनामनिर्वर्त्तकआस्ते ॥ १८ ॥ योसौगुहप्रहरणोन्मथितनितंबकुंजोपि
क्षीरोदेनासिच्यमानोभगवतावरुणेनाभिगुप्तोविभयोबभूव ॥ १९ ॥ तस्मि
न्नपिप्रैयव्रतोघृतपृष्ठोनामाधिपतिःस्वेदीपेवर्षाणिसप्तविभज्यतेषुपु

त्रनामसुसप्तरिक्थादान्वर्षपान्निवेश्यस्वयंभगवान्भगवतःपरमक
ल्याणयशसआत्मभूतस्यहरेश्चरणारविंदमुपजगाम॥२०॥आमोमधु
रुहोमेघपृष्ठःसुधामाभ्राजिष्ठोलोहितार्णोवनस्पतिरितिघृतपृष्ठसुतास्ते
षांवर्षगिरयःसप्तसप्तैवनद्यश्चाभिख्याताःशुक्लोवर्द्धमानोभोजनउपब
र्हिणोनंदोनंदनःसर्वतोभद्रइति॥२१॥अभयामृतौघाआर्यकातीर्थवती
वृत्तिरूपवतीपवित्रवतीशुक्लेति॥यासामंभःपवित्रममलमुपयुंजानाःपु
रुषऋषभद्रविणदेवकसंज्ञावर्षपुरुषाआपोमयंदेवमपांपूर्णेनांजलिना
यजंते॥२२॥आपःपुरुषवीर्याःस्थपुनंतीर्भूर्भुवःसुवः॥तानःपुनीतामीवघ्नीः
स्पृशतामात्मनाभुवइति॥२३॥एवंपरस्तात्क्षीरोदात्परितःउपवेशितः

॥भा॰ पं॰॥
॥६३॥

शाकद्वीपोद्वात्रिंशल्लक्षयोजनायामःसमानेनचदधिमंडोदेनपरीतःयस्मिन्
हिशाकोनाममहीरुहःस्वक्षेत्रव्यपदेशकोयस्यहिमहासुरभिगंधस्तंद्वीपम
नुवासयति॥२४॥तस्यापिप्रैयव्रतएवाधिपतिर्नाम्नामेधातिथिःसोपिविभज्य
सप्तवर्षाणिपुत्रनामानितेषुस्वात्मजान्पुरोजवमनोजवपवमानधूम्रानीक
चित्ररेफबहुरूपविश्वधारसंज्ञान्निधाप्याधिपतीन्स्वयंभगवत्यनंतआवे
शितमतिस्तपोवनंप्रविवेश॥२५॥एतेषांवर्षमर्यादागिरयोनद्यश्चसप्तसप्तै
व॥ईशानउरुशृंगोबलभद्रःशतकेसरःसहस्रस्रोतोदेवपालोमहानसइ
ति॥अनघाऽयुर्दाउभयस्पृष्टिरपराजितापंचपदीसहस्रस्रुतिर्निजधृतिरि
ति॥२६॥तद्वर्षपुरुषाऋतव्रतसत्यव्रतदानव्रतानुव्रतनामानोभगवंतंवा

अ॰ २०

॥राम॰॥
॥६३॥

स्वात्मकंप्राणायामविधुतरजस्तमसःपरमसमाधिनायजंते ॥२७॥ अंतःप्रवि
श्यभूतानियोबिभर्त्यात्मकेतुभिः ॥ अंतर्यामीश्वरःसाक्षात्पातुनोयद्वशेस्फु
टं ॥२८॥ एवमेवदधिमंडोदात्परतःपुष्करद्वीपस्ततोद्विगुणायामःसमंततःउप
कल्पितःसमानेनस्वादूदकेनसमुद्रेणबहिरावृतोयस्मिन्बृहत्पुष्करंज्वल
नशिखामलकनकपत्रायुतायुतंभगवतःकमलासनस्याध्यासनंपरिकल्पि
तंतद्द्वीपमध्येमानसोत्तरनामैकएवार्वाचीनपराचीनवर्षयोर्मर्यादाचलो
युतयोजनोच्छ्रायायामोयत्रतुचतसृषुदिक्षुचत्वारिपुराणिलोकपालानामिं
द्रादीनांयदुपरिष्टात्सूर्यरथस्यमेरुंपरिभ्रमतःसंवत्सरात्मकंचक्रंदेवानामहो
रात्राभ्यांपरिभ्रमति ॥३०॥ एतद्द्वीपस्याप्यधिपतिःप्रैयव्रतोवीतहोत्रोनामैत

स्यात्मजौ रमणकधातकिनामानौ वर्षपती नियुज्य स स्वयं पूर्वजवद्भगवत्क
र्मशील इत्यास्ते ॥ ३१ ॥ तद्वर्षपुरुषा भगवंतं ब्रह्मरूपिणं सकर्मकेन कर्मणारा
धयंतीदं चोदाहरंति ॥ ३२ ॥ यत्तत्कर्ममयं लिंगं ब्रह्मलिंगं जनोर्चयेत् ॥ एकां
तमद्वयं शांतं तस्मै भगवते नम इति ॥ ३३ ॥ श्रीशुक उवाच ॥ ततः परस्ताल्लो
कालोकनामाचलो लोकयोरंतराले परित उपक्षिप्तः ॥ ३४ ॥ यावन्मानसोत्त — कालो ५
न्य — रमेर्वोरंतरं तावती भूमिः कांचन्यादर्शतलोपमा ॥ यस्यां प्रहितः पदार्थो न कथं
चित्पुनः प्रत्युपलभ्यते तस्मात्सर्वसत्वपरिहृतासीत् ॥ ३५ ॥ लोकालोक इति
समाख्या यदनेनाचलेन लोकालोकस्यांतर्वर्तिनावस्थाप्यते ॥ ३६ ॥ स लोकत्र
यांते परित ईश्वरेण विहितः यस्मात्सूर्यादीनां ध्रुवापवर्गाणां ज्योतिर्गणानां ग

भस्तयोर्वाचीनास्त्रींल्लोकानावितन्वानानकदाचित्पराचीनाभवितुमुत्सहं
तेतावदुन्नहनायामः॥३७॥एतावाल्लोकविन्यासोमानलक्षणसंस्थाभिर्वि
चिंतितःकविभिःसतुपंचाशत्कोटिगुणितस्यभूगोलस्यतुरीयभागोयंलोका
लोकाचलः॥३८॥तदुपरिष्टाच्चतसृष्वाशास्वात्मयोनिनाऽखिलजगद्गुरुणा
धिनिवेशितायेद्विरदपतयऋषभःपुष्करचूडोवामनोपराजितइतिसकल
लोकस्थितिहेतवः॥३९॥तेषांस्वविभूतीनांलोकपालानांविविधवीर्योपबृंह
णायभगवान्परममहापुरुषोमहाविभूतिपतिरंतर्याम्यात्मनोविशुद्धस
त्वंधर्मज्ञानवैराग्यैश्वर्याद्यष्टमहासिद्ध्युपलक्षणंविष्वक्सेनादिभिःस्वपा
र्षदप्रवरैःपरिवारितोनिजवरायुधोपशोभितैर्निजभुजदंडैःसंधारयमाणः

॥भा·पं·॥
॥६५॥

अ·२०

तस्मिनुगिरिवरेसमंतात्सकललोकस्वस्तयेआस्ते॥४०॥आकल्पमेवंवेषंग
तएषआत्मयोगमाययाविरचितविविधलोकयात्रागोपीथायेत्यर्थः॥४१॥
योंतर्विस्तारएतेनह्यलोकपरिमाणंचव्याख्यातंयद्बहिर्लोकालोकाचलात्
॥ततःपरस्ताद्योगेश्वरगतिंविशुद्धामुदाहरंति॥४२॥अंडमध्यगतःसूर्योद्यावा
भूम्योर्यदंतरं॥सूर्यांडगोलयोर्मध्येकोट्यःस्युःपंचविंशतिः॥४३॥मृतेंडएष
एतस्मियदभूत्ततोमार्तंडइतिव्यपदेशः॥हिरण्यगर्भइतियद्धिरण्यांडस
मुद्भवः॥४४॥सूर्येणहिविभज्यंतेदिशःखंद्यौर्महीभिदा॥स्वर्गापवर्गौन
रकारसौकांसिचसर्वशः॥४५॥देवतिर्यङ्मनुष्याणांसरीसृपसवीरुधां
सर्वजीवनिकायानांसूर्यआत्मादृगीश्वरः॥४६॥इतिश्रीभागवतेमहापुराणे

॥एम·॥
॥६५॥

ल ४

पंचमस्कंधे भुवनकोशसमुद्रद्वीपवर्षसंनिवेशपरिमाणे विंशोऽध्यायः॥ ॥२०॥
एवमध्यायविंशत्या भूमर्यादा निरूपिता॥ अतः परं द्युमर्यादापालनं त्रिभिरु
च्यते॥१॥ एकविंशे रवेः कालचक्रेण भ्रमतोन्वहं॥ स्वगत्या राशिसंचारैर्लो
कयात्रा निरूप्यते॥२॥ श्रीशुक उवाच॥ एतावानेव भूवलयस्य संनिवेशः प्रमा
णलक्षणतो व्याख्यातः॥ एतेन हि दिवो मंडलमानं तद्विद उपदिशंति॥१॥
यथा द्विदलयोर्निष्पावादीनां ते अंतरेणांतरिक्षं तदुभयसंधितं॥२॥ यन्मध्य
गतो भगवांस्तपतां पतिस्तपन आतपेन त्रिलोकीं प्रतपत्यवभासयत्या
त्मभासा स एष उदगयनदक्षिणायनवैषुवतसंज्ञाभिर्मांद्यशैघ्र्यसमाना
भिर्गतिभिरारोहणअवरोहणसमावस्थानेषु यथासवनमभिपद्यमानो म

क्रादिषुराशिष्वहोरात्राणिदीर्घह्रस्वसमानानिविधत्ते ॥३॥ यदामेषतुलयो
र्वर्त्ततेतदाहोरा।त्राणिसमानानिभवंति ॥ यदावृषभादिषुपंचसुचराशिषुच
रतितदाहाहान्येववर्द्धंते ॥ ह्रसतिचमासिमास्येकैकाघटिकारात्रिषु ॥४॥ यदा
वृश्चिकादिषुपंचसुवर्त्ततेतदाहोरात्राणिविपर्ययाणिभवंति ॥५॥ यावद्दक्षि
णायनमहानिवर्द्धंतेयावदुदगयनंरात्रयः ॥६॥ एवंनवकोटयएकपंचाश
ल्लक्षाणियोजनानांमानसोत्तरगिरिपरिवर्त्तनस्योपदिशंति ॥ तस्मिन्नैंद्रीं
पुरींपूर्वस्मान्मेरोर्देवधानींनामदक्षिणतोयाम्यांसंयमनींनामपश्चाद्वारु
णींनिम्लोचनींनामउत्तरतःसोम्यांविभावरींनाम ॥ तासूदयमध्याह्नास्तम
यनिशीथानीतिभूतानांप्रवृत्तिनिवृत्तिनिमित्तानिसमयविशेषेणमेरोश्च

तुर्द्दिशं ॥ ७ ॥ तत्रत्यानांदिवसमध्यंगतएवसदादित्यस्तपतिसव्येनाचल
नूदक्षिणेनकरोति ॥ ८ ॥ यत्रोदेतितस्यहसमानसूत्रनिपातेनिम्लोचति ॥ ९ ॥
यत्रक्वचनस्यंदे नाभितपतितस्यहैषसमानसूत्रनिपातेप्रस्वापयति ॥ तत्र
गतंनपश्यंतियेतंसमनुपश्येरन् ॥ १० ॥ यदाचैंद्र्याःपुर्याःप्रचलतेपंचदश
घटिकाभिर्याम्यांसपादकोटिद्वयंयोजनानांसार्द्धद्वादशलक्षाणिसाधिका
निचोपयाति ॥ ११ ॥ एवंततोवारुणींसौम्यामैंद्रींचपुनस्तथान्येचग्रहाःसो
मादयोनक्षत्रैःसहज्योतिश्चक्रेसमभ्युद्यंतिसहवानिम्लोचंति ॥ १२ ॥ एवंमु
हूर्त्तेनचतुस्त्रिंशल्लक्षयोजनान्यष्टशताधिकानिसौरोरथस्त्रयीमयोसौ
चतसृषुपरिवर्त्ततेपुरीषु ॥ १३ ॥ यस्यैकंचक्रंद्वादशारंषण्नेमित्रिणाभिसं

वत्सरात्मकंसमामनंति॥तस्याक्षोमेरोर्मूर्द्धनिकृतोमानसोत्तरेकृतेतरभा
गोयत्रप्रोत्तंरविरथचक्रंतैलयंत्रचक्रवद्भ्रमन्मानसोत्तरगिरौपरिभ्रमति॥१४
तस्मिन्नक्षेकृतमूलोद्वितीयोक्षःतुर्यमानेनसंमितस्तैलयंत्राक्षवद्ध्रुवेकृ
तोपरिभागः॥१५॥रथनीडस्तुषट्त्रिंशल्लक्षयोजनायतस्तत्तुरीयभागवि
शालस्तावान्रविरथयुगोयत्रहयाःछंदोनामानःसप्तारुणयोजितावहं
तिदेवमादित्यं॥१६॥पुरस्तात्सवितुररुणःपश्चाच्चनियुक्तःसौत्येकर्मणिकि
लास्ते॥१७॥तथावालखिल्याऋषयोंगुष्ठपर्वमात्राःषष्टिसहस्राणिपुरु
तःसूर्यंसूक्तवाकायनियुक्ताःसंस्तुवंति॥१८॥तथान्येचऋषयोगंधर्वाप्सर
सोनागाग्रामण्योयातुधानादेवाइत्येकैकशोगणाःसप्तचतुर्दशमासिमा

सिभगवंतंसूर्यमात्मानंनानानामानंपृथङ्नानानामानःपृथक्कर्मभिर्द्वंद्वमुउ
पासते॥१९॥लक्षोत्तरंसार्द्धनवकोटियोजनपरिमंडलंभूवलयस्यक्षणेनसग
व्यूत्युत्तरंद्विसहस्रयोजनानिसंभुंक्ते॥२०॥इतिश्रीभागवतेमहापुराणेपंच॰ज्योति
श्चक्रसूर्यरथवर्णनंनामएकविंशोध्यायः॥२१॥यदेतद्भगवतआदित्यस्यमेरुंध्रुवंच
प्रदक्षिणेनपरिक्रामतोराशीनामभिमुखंचाप्रदक्षिणंप्रचालितंभगवतो
पवर्णितममुष्यवयंकथमनुमीमहीति॥सहोवाच॥ ॥यथाकुलालचक्रे
णभ्रमतासहभ्रमतांतदाश्रयाणांपिपीलिकादीनांगतिरन्यैवप्रदेशांतरेष्व
प्युपलभ्यमानत्वात्॥एवंनक्षत्रराशिभिरुपलक्षितेनकालचक्रेणध्रुवंमे
रुंचप्रदक्षिणेनपरिधावतासहपरिधावमानानांतदाश्रयाणांसूर्यादीनां
द्वाविंशेसोमशुक्रादेःस्थानमाहोत्तरोत्तरं॥तत्तद्गत्यनुसारेणदृष्टानिष्टंतथानृणां॥१॥राजोवाच॥ ८॥

ग्रहाणांगतिरन्यैवनक्षत्रांतरेराश्यंतरेचोपलभ्यमानत्वात् ॥२॥ सएषभगवा
नादिपुरुषएवसाक्षान्नारायणोलोकानांस्वस्तयआत्मानंत्रयीमयंकर्मविशु
द्धिनिमित्तंकविभिरपिचवेदेनविजिज्ञास्यमानोद्वादशधाविभज्यषट्सुवस
तादिषुऋतुषुयथोपजोषमृतगुणान्विदधाति ॥३॥ तमेतमिहपुरुषास्त्रय्या
विद्ययावर्णाश्रमाचारानुपथाउच्चावचैःकर्मभिराम्नातैर्योगवितानैश्चश्र
द्धयायजंतोंजसाश्रेयःसमधिगच्छंति ॥४॥ अथसएषआत्मालोकानांद्यावा
पृथिव्योरंतरेणनभोवलयस्यकालचक्रगतोद्वादशमासान्भुंक्तेराशिसंज्ञा
न्संवत्सरावयवान्मासपक्षद्वयंदिवानक्तंचेतिसपादर्क्षद्वयमुपदिशंति
॥ यावताषष्ठमंशंभुंजीतसवैऋतुरित्युपदिश्यतेसंवत्सरावयवः ॥५॥ अथ

चयावताधेननभोवीथ्यांप्रचरतितंकालमयनमाचक्षते॥६॥अथचयाव
न्नभोमंडलंसहद्यावापृथिव्योर्मंडलाभ्यांकार्त्स्न्येनसहभुंजीततंकालंसं
वत्सरंपरिवत्सरमिडावत्सरमनुवत्सरंवत्सरमितिभानोर्मांद्यशैघ्र्यसम
गतिभिःसमामनंति॥७॥एवंचंद्रमाअर्कगभस्तिभ्यउपरिष्टाल्लक्षयोज
नतउपलभ्यमानोऽर्कस्यसंवत्सरभुक्तिंपक्षाभ्यांमासभुक्तिंसपादर्क्षाभ्यां
दिनेनैवपक्षभुक्तिमुग्रचारीद्रुततरगमनोभुंक्ते॥८॥अथचापूर्यमाणाभि
श्चकलाभिःपितॄणामहोरात्राणिपूर्वपक्षापरपक्षाभ्यांवितन्वानःसर्वजीव
निवहप्राणोजीवश्चएकमेकंनक्षत्रंत्रिंशतामुहूर्तैर्भुंक्ते॥९॥यएषषोडशक
लःपुरुषोभगवान्मनोमयोन्नमयोऽमृतमयोदेवपितृमनुष्यभूतपशुप

२ अमराणांक्षीयमाणाभिश्चकलाभिः २

क्षिसरीसृपवीरुधांप्राणाप्यायनशीलत्वात्सर्वमयइतिवर्णयंति ॥१०॥ त
तउपरिष्टात्त्रिलक्षयोजनतोनक्षत्राणिमेरुंदक्षिणेनैवकालायनईश्वरयो
जितानिसहाभिजिताष्टाविंशतिः । ततउपरिष्टादुशनाद्विलक्षयोजनतउपल
भ्यते ॥ पुरतःपश्चात्सहैवचार्कस्यशैघ्र्यमांद्यसाम्याभिर्गतिभिरर्कवच्चरति
॥ लोकानांनित्यदानुकूलएवप्रायेणवर्षयन्चारेणानुमीयतेसवृष्टिविष्टं
भग्रहोपशमनः ॥१२॥ उशनसाबुधोव्याख्यातस्ततःउपरिष्टाद्द्विलक्षयो
जनतोबुधः ॥ सोमसुतउपलभ्यमानःप्रायेणशुभकृद्यदार्काद्व्यतिरिच्येत
तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते ॥१३॥ अतऊर्द्धमंगारकोपि
योजनलक्षद्वितयउपलभ्यमानस्त्रिभिस्त्रिभिःपक्षैरेकैकशोराशीन्द्वा

दशानुभुंक्ते ॥ यदि न वक्रेणाभिवर्त्तते प्रायेणाशुभग्रहोघशंसः ॥ १४ ॥ ततउ
परिष्टाद्विलक्षयोजनांतरगतो भगवान्बृहस्पतिरेकैकस्मिन्राशौ परिव
त्सरं परिवत्सरं चरति ॥ यदि न वक्रः स्यात्प्रायेणानुकूलो ब्राह्मणकुलस्य ॥ १५
ततउपरिष्टाद्योजनलक्षद्वयात्प्रतीयमानः शनैश्चर एकैकस्मिन्राशौ त्रिं
शत्रिंशन्मासान्विलंबमानः सर्वामेवानुपर्येति ॥ तावद्भिरनुवत्सरैः प्राये
णहि सर्वेषामशांतिकरः ॥ १६ ॥ ततउत्तरस्मादृषयएकादशलक्षयोजनां
तरउपलभ्यंते ॥ यएव लोकानां शमनुभावयंतो विष्णोर्यत्परमं पदं प्रद भगवतो
क्षिणं प्रक्रमंति ॥ १७ ॥ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे ज्योतिश्चक्रव
र्णने द्वाविंशोध्यायः ॥ ॥ त्रयोविंशो ध्रुवस्यानं ज्योतिश्चक्राश्रयततः ॥ शिशुमा

॥भा॰ पं॰॥
॥७०॥

अ॰ २३

रस्वरूपेणहरेश्चस्थितिरुच्यते॥१॥ शुकउवाच॥ अथतस्मात्परतःत्रयोदश
लक्षयोजनांतरतोयत्तद्विष्णोःपरमंपदमभिवदंति॥ यत्रहमहाभागवतो
ध्रुवऔत्तानपादिरग्निनेंद्रेण प्रजापतिनाकश्यपेनधर्मेणचसमकाल
युग्भिःसबहुमानंदक्षिणतःक्रियमाणइदानीमपिकल्पजीविनामाजी
व्यउपास्ते तस्येहानुभावउपवर्णितः॥१॥ सहिसर्वेषांज्योतिर्गणानांग्रह
नक्षत्रादीनामनिमिषेणाव्यक्तरंहसाभगवताकालेनभ्राम्यमाणानांस्था
णुरिवावष्टंभईश्वरेणविहितःशश्वदवभासते॥ यथामेढीस्तंभआक्रमण
पशवःसंयोजितास्त्रिभिःसवनैर्यथास्थानंमंडलानिचरंति॥२॥ एवंभगणा
ग्रहादयएतस्मिन्नंतर्बहिर्योगेनकालचक्रआयोजिताध्रुवमेवावलंब्यवा

॥राम॰॥
॥७०॥

युनोदीर्यमाणा आकल्पांतं परिचक्रमंति ॥ नभसि यथा मेघाः श्येनादयो
वायुवशाः कर्मसारथयः परिवर्त्तंते ॥ एवं ज्योतिर्गणाः प्रकृतिपुरुषसंयोगानु
गृहीताः कर्मनिर्मितगतयो भुवि न पतंति ॥ ३ ॥ केचित्तू एतज्ज्योतिरनीकं शि
शुमारसंस्थानेन भगवतो वासुदेवस्य योगधारणायामनुवर्णयंति ॥ ४ ॥ यस्य
पुच्छाग्रेवाक्छिरसः कुंडलीभूतदेहस्य ध्रुव उपकल्पितः ॥ तस्य लांगूले प्रजा
पतिरग्निरिंद्रो धर्म इति ॥ पुच्छमूले धाता विधाता च कट्यां सप्तर्षभः ॥ तस्य द
क्षिणावर्त्तकुंडलीभूतशरीरस्य यान्युदगयनानि दक्षिणपार्श्वे तु नक्षत्रा
ण्युपकल्पयंति दक्षिणायनानि तु सव्ये यथा शिशुमारस्य कुंडलीभोगसं
निवेशस्य पार्श्वयोरुभयोरप्यवयवाः समसंख्या भवंति ॥ पृष्ठेत्वजवीथी आ

काशगंगाचोदरतः ॥५॥ पुनर्वसूपुष्योदक्षिणवामयोःश्रोण्योरार्द्राश्लेषेच
दक्षिणवामयोःपश्चिमयोःपादयोःअभिजिदुत्तराषाढेदक्षिणवामयोर्नासि
कयोर्यथासंख्यंश्रवणपूर्वाषाढेदक्षिणवामयोर्लोचनयोःधनिष्ठामूलंच
दक्षिणवामयोःकर्णयोःमघादीन्यष्टनक्षत्राणिदक्षिणायनानिवामपा
र्श्ववक्तिषुयुंजीततथैवमृगशीर्षादीन्युदगयनानिदक्षिणपार्श्ववक्तिषु
प्रातिलोम्येनप्रयुंजीतशतभिषाज्येष्ठस्कंधयोर्दक्षिणवामयोर्न्यसेत् ॥६॥
उत्तराहनावगस्तिरधराहनौयमःमुखेचांगारकःशनैश्चरउपस्थेबृहस्पतिः
ककुदिवक्षस्यादित्योहृदयेनारायणोमनसिचंद्रोनाभ्यामुशनास्तन
योरश्विनौबुधःप्राणापानयोराहुर्गलेकेतवःसर्वांगेषुरोमसुसर्वेताराग

णाः एतदुहैवभगवतोविष्णोःसर्वदेवतामयंरूपमहरहःसंध्यायांप्रयतोवा
ग्यतोनिरीक्ष्यमाणउपतिष्ठेतनमोज्योतिर्लोकायकालायनायानिमिषां
पतयेमहापुरुषायाभिधीमहीति ॥ ग्रहर्क्षतारामयमाधिदेविकंपापापहं
मंत्रकृतांत्रिकालंनमस्यतःस्मरतोवात्रिकालंनश्येततत्कालजमाशुपा
पं ॥८॥ इतिश्रीभागवतेमहा० पंचम० शिशुमारवर्णनंत्रयोविंशोऽध्यायः ॥२३॥
एवंत्रिभिर्द्युमर्यादापालनंवर्णितंतथा ॥ अधोभुवनमर्यादापालनंत्रिभिरु
च्यते ॥१॥ चतुर्विंशेरवेरर्वाक्स्वर्भान्वादिस्थितिःक्रमात् ॥ अतलादिबिलस्व
र्गामर्यादासप्तवर्णिताः ॥२॥ श्रीशुकउ० ॥ अधस्तात्सवितुर्योजनायुतेस्वर्भा
नुर्नक्षत्रवच्चरतीत्येके ॥ योसावमरत्वंग्रहत्वंचालभतभगवदनुकंपयास्व

यमसुरापसदःसैंहिकेयोह्यतदर्हः॥तस्यतातजन्मकर्माणिचोपरिष्टाद्व
क्ष्यामः॥१॥यददस्तरणेर्मंडलंप्रतपतस्तद्विस्तरतोयोजनायुतमाचक्षतेद्वा
दशसहस्रंसोमस्यत्रयोदशसाहस्रंराहोर्यःपर्वणितद्व्यवधानकृद्वैरानुबं
धस्सूर्याचंद्रमसावभिधावति॥२॥तन्निशम्योभयत्रापिभगवतारक्षणाय
प्रयुक्तंसुदर्शनंनामभागवतंदयितमस्त्रंतत्तेजसादुर्विषहंमुहुःपरिव
र्तमानमभ्यवस्थितोमुहूर्तमुद्विजमानश्चकितहृदयआरादेवनिवर्ततेतदुपराग
मितिवदंतिलोकाः॥३॥ततोधस्तात्सिद्धचारणविद्याधराणांसदनानितावन्मात्र
एव॥४॥ततोधस्ताद्यक्षरक्षःपिशाचप्रेतभूतगणानांविहाराजिरमंतरिक्षंयावद्वा
युःप्रवातियावन्मेघाउपलभ्यंते॥५॥ततोऽधस्ताच्छतयोजनांतरइयंपृथवीया

बद्धंसभासद्येनसुपर्णादयःपतत्रिप्रवराउत्पतंतिद्रुतं ॥६॥ उपवर्णितंभूमेर्यथासंनिवेशावस्थानं ॥ अवनेरप्यधस्तात्सप्तभूविवराःएकैकशोयोजनायुतांतरेणायामविस्तारेणोपक्लृप्ताः ॥ अतलंवितलंसुतलंतलातलंमहातलंरसातलंपातालमिति ॥७॥ एतेषुहिबिलस्वर्गेषुस्वर्गादप्यधिककामभोगैश्वर्यानंदविभूतिभिःसुसमृद्धभवनोद्यानाक्रीडाविहारेषुदैत्यदानवकाद्रवेयानित्यप्रमुदितानुरक्तकलत्रापत्यबंधुसुहृदनुचरागृहपतयईश्वरादप्यप्रतिहतकामामायाविनोदानिवसंति ॥८॥ येषुमहाराजमयेनमायाविनाविनिर्मिताःपुरोनानामणिप्रवरप्रवेकविरचितविचित्रभवनप्राकारगोपुरसभाचैत्यचत्वरायतनादिभिर्नागासुरमिथुनपारावतशुकसारिकाकीर्णकृत्रिमभूमि

भिर्विवरेश्वरगृहोत्तमैः समलंकृताश्चकासंति ॥९॥ उद्यानानि चातितरां मनइंद्रि
यानंदिभिः कुसुमफलस्तवकसुभगकिसलयावनतरुचिरविटपविटपिनां लतां
गालिंगितानां श्रीभिः समिथुनविविधविहंगमजलाशयानाममलजलपूर्णा
नां झषकुलोल्लंघनक्षुभितनीरनीरजकुमुदकुवलयकह्लारनीलोत्पललोहि
तशतपत्रादिवनेषु कृतनिकेतनानामेकविहाराकुलमधुरविविधस्वनादि
भिरिंद्रियोत्सवैरमरलोकश्रियमतिशयितानि ॥१०॥ यत्र ह वाव न भयमहोरा
त्रादिभिः कालविभागैरुपलक्ष्यते ॥११॥ यत्र महाहिप्रवरशिरोमणयः सर्वं तमः
प्रबाधंते ॥१२॥ न वा एतेषु वसतां दिव्यौषधिरसरसायनान्नपानस्नानादिभि
राधयो व्याधयो वलीपलितजरादयश्च देहवैवर्ण्यदौर्गंध्यस्वेदक्लमग्लानिरि

```
[OrderDescription]
,CREATED=30.12.19 11:04
,TRANSFERRED=2019/12/30 at 11:21:46
,PAGES=148
,TYPE=STD
,NAME=S0002411
,Book Name=M-2322-SHRIBHAGWAT PANCHAM SANKADH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
```

```
FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
```

```
FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
```

```
FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
```

```
FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
```

```
FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
```

```
FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
```

```
FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,
```